THE HITOPADESA

(EXPURGATED)

BY

PANDIT SIVADATTA MAHAMAHOPADHYAYA

HEAD PANDIT, ORIENTAL COLLEGE, LAHORE, AND FELLOW OF THE PUNJAB UNIVERSITY.

Vol. I. (Text.)

With references to pages of Vol. III.

LAHORE.

DAS BROTHERS, ANARKALI.

1921

5th Edition] [*Price Annas Twelve.*

Only Title Page Printed at the Arorbans Press,-Lahore

॥ श्रीः ॥

R. B. Purohit Gopinathji, M. A., Senior Member Council, Jaipur, Rajputana लिखते हैं:—

आज मुझे महामहोपाध्याय पण्डित शिवदत्त जी सम्पादित "हितोपदेश" और उनकी बनाई हुई हितोपदेश की हिन्दी टीका देखने का सौभाग्य प्राप्त हुआ। पुस्तक की प्रशंसा की आवश्यकता नहीं। हितोपदेश नाम से ही इस के सम्पूर्ण गुण और लाभ समीचीनता से प्रकट हैं। संस्कृत विद्वानों में शायद ही कोई निकले जिस ने हितोपदेश के सदुपदेशों से लाभ नहीं उठाया हो। मूलग्रन्थ पृथक् और हिन्दी टीका पृथक् छपवाई गई है। इससे पाठकों के शुक समान टीका रट लेने में सुगमता नहीं होती बल्कि मूल पाठ के लगाने और समझ लेने की ओर विशेष अभिरुचि होती है।

प्रस्तुत संस्करण में ऐसे पद बिलकुल नहीं रक्खे गए हैं कि बालक-बालकादि के संमुख जिन के उच्चारण में कुछ भी संकोच हो सके।

प्रायः देखा गया है कि टीकाकार कठिन २ पदों और वाक्यों की तो कुछ व्याख्या नहीं करते और सुगम स्थलों की अनावश्यक और विस्तृत टीका करने में अपना पाण्डित्य दिखलाया करते हैं। इस टीका में यह विशेषता है कि जो पद और वाक्य वास्तव में दुर्बोध हैं केवल उनही की टीका इसमें की गई है। इससे पुस्तक का महत्व पूर्णरूप से बढ़ गया है। यही नहीं बल्कि कठिन स्थलों के सुगम करने में पण्डित जी ने विशेष परिश्रम किया है और इस में वह पूर्ण कृतकार्य भी हुए हैं। क्यों न हो; पण्डित जी एक सुप्रसिद्ध और सिद्धहस्त अनुभवी विद्वान् सम्पादक और टीकाकार हैं। कहीं कहीं केवल मात्रा तथा अक्षर मात्र के परिवर्त्तन से अर्थ में बहुत चमत्कार हो गया है।

भूमिका में पण्डित जी ने स्वयं लिखा है कि "(१) जिस पद और समास का अर्थ सब ही अध्यापक अश्लील करते चले आते हैं उसी पद वा समास का अर्थ व्याकरण तथा कोश के अनुसार श्लील करके दिखला दिया है। इस अर्थ के करते समय इस बात पर बड़ा ध्यान रक्खा है कि प्रसंग में दोष न आ पड़े। (२) जहां कहीं प्रसंग दोष बिना ऐसा अर्थ नहीं निकल सकता था वहां पर एक दो अक्षरों से पाठ बदल दिया गया है" यह सब सर्वथा सत्य है॥

केवल विद्यार्थियों के लिये ही नहीं यह पुस्तक विद्वानों के भी बड़े काम की है। पण्डित जी का परिश्रम सर्वथा विशेष आदरणीय और प्रशंसनीय है।

"विद्या ददाति विनयं विनयाद्याति पात्रताम्,
पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततः सुखम्"।

यह श्लोक बहुत प्रसिद्ध है और संस्कृत के जानने वाले प्रायः सब ही प्रसंगतः इस को बोला करते हैं। परन्तु जो अर्थ पण्डित जी ने किया है वह प्रायः सब नहीं जानते। श्लोक के लिये मूल पुस्तक पृष्ठ १ श्लोक ६ और अर्थ के लिये टीका की पुस्तक श्लोक संख्या ६ देखने से यह बात भलीभांति विदित होगी॥

मूल पुस्तक में पृष्ठ ३ श्लोक २० के "कुशूलापूरणाढकैः" का अर्थ टीका की पुस्तक श्लोक संख्या २० देखने से पण्डित जी के किये हुए अर्थ का गौरव और चमत्कार प्रत्यक्ष प्रमाणित होगा। कहां तक लिखा जावे पुस्तक अत्यन्त उपयोगी और लाभदायक तथा सब ही के संग्रह करने योग्य है।

जयपुर,
२६-११-१६ } पुरोहित गोपीनाथ।

छन्द मात्रा, वर्ण भेद ये दो प्रकार के होते हैं, तिन में आर्या गीति आदि जिन छन्दों में मात्राओं की गणना नियत है वे मात्रा छन्द कहलाते हैं और जिन छन्दों में वर्ण अक्षर स्वरों की गणना हो, उन्हीं को वर्णछन्द कहते हैं। तिन में जिस के ४ चरणों में समान वर्ण हों, वह समवृत्त कहलाता है; जिस के प्रथम चरण तृतीय चरण के समान, द्वितीय चरण चतुर्थचरण के समान हो सो अध समवृत्त कहलाता है; जिस के ४ चरण भिन्न रूप के होवें सो विषम कहलाता है। एक जातिके भिन्न रूप भिन्न पादों में हों तो उपजाति होता है॥

छन्दोजाति रूपसंख्या चक्रम्।

वर्ण छन्दसि।

१ पाद में अक्षर	नाम जाति	रूप संख्या
१	उक्ता[1] (कथा)	२
२	अत्युक्ता[2] (कथा)	४
३	मध्या	८

(१) यह जानना उचित है कि यदि श्लोक के १ चरण में १ ही अक्षर हो अर्थात् ४ अक्षरों का ही श्लोक हो तो उस छन्दो जाति का नाम उक्ता (कथा) होता है और उस के गुरुलघु भेद से दो भेद हैं जैसे—'वन्दे। देवम्' ॥ १ ॥ 'शिव। जय' ॥ २ ॥

(२) अत्युक्ता (कथा) छन्दोजाति के गुरुलघु भेद से ४ रूप होते हैं। जैसे—'गोपस्त्रीभिः। कृष्णो रेमे' ॥ १ ॥ 'उमा शिवम्। [illegible]ता गिरौ' ॥ २ ॥ देव याहि। पाहि भाहि ॥ ३ ॥ हर जय शिव मृड ॥ ४ ॥

इसी प्रकार से मध्या में ८ उदाहरण, प्रतिष्ठा के १६ उदाहरण होते हैं इत्यादि सब छन्दों के परिगणित समझ लेना उचित है॥

एक पाद में अक्षर	नाम जाति	रूप संख्या
४	प्रतिष्ठा	१
५	सुप्रतिष्ठा	३
६	गायत्री	६
७	उष्णिह्	१२८
८	अनुष्टुब्	२५६
९	बृहती	५१२
१०	पङ्क्ति	१०२४
११	त्रिष्टुभ्	२०४८
१२	जगती	४
१३	अतिजगती	[illegible]
१४	शक्करी	१६३
१५	अतिशक्करी	३२७६८
१६	अष्टि	६५५३६
१७	अत्यष्टि	१३१०७२
१८	धृति	२६२१४४
१९	अतिधृति	५२४२८८
२०	कृति	१०४८५७६
२१	प्रकृति	२०९७१५२
२२	आकृति	४१९४३०४
२३	विकृति	८३८८६०८
२४	संकृति	१६७७७२१६
२५	अतिकृति	३३५५४४३२
२६	उत्कृति	६७१०८८६४

बाल—

हितोपदेशः ।

[टीका पुस्तक पृ० १—२१४]

———:०:———

सिद्धिः साध्ये सतामस्तु प्रसादात्तस्य धूर्जटेः ।
जाह्नवीफेनलेखेव यन्मूर्ध्नि शशिनः कला ॥ १ ॥

प्रस्तावना—

श्रुतो हितोपदेशोऽयं पाटवं संस्कृतोक्तिषु ।
वाचां सर्वत्र वैचित्र्यं नीतिविद्यां ददाति च ॥ २ ॥
अजरामरवत्प्राज्ञो विद्यामर्थं च चिन्तयेत् ।
गृहीत इव केशेषु मृत्युना धर्ममाचरेत् ॥ ३ ॥
सर्वद्रव्येषु विद्यैव द्रव्यमाहुरनुत्तमम् ।
अहार्यत्वादनर्घ्यत्वादक्षयत्वाच्च सर्वदा ॥ ४ ॥
संयोजयति विद्यैव नीचगाऽपि नरं सरित् ।
समुद्रमिव दुर्धर्षं नृपं भाग्यमतः परम् ॥ ५ ॥
विद्या ददाति विनयं विनयाद्याति पात्रताम् ।
पात्रत्वाद्धनमाप्नोति धनाद्धर्मं ततः सुखम् ॥ ६ ॥
विद्या शस्त्रस्य शास्त्रस्य द्वे विद्ये प्रतिपत्तये ।
आद्या हास्याय वृद्धत्वे द्वितीयाद्रियते सदा ॥ ७ ॥
यन्नवे भाजने लग्नः संस्कारो नान्यथा भवेत् ।
कथाच्छलेन बालानां नीतिस्तदिह कथ्यते ॥ ८ ॥
मित्रलाभः सुहृद्भेदो विग्रहः सन्धिरेव च ।
पञ्चतन्त्रात्तथान्यस्माद् ग्रन्थादाकृष्य लिख्यते ॥ ९ ॥

[टीका पु० पृ० २।४—४।४]

अस्ति भागीरथीतीरे पाटलिपुत्रनामधेयं नगरम् ॥

तत्र सर्वस्वामिगुणोपेतः सुदर्शनो नाम नरपतिरासीत् ॥

स भूपतिरेकदा केनापि पठ्यमानं श्लोकद्वयं शुश्राव—

'अनेकसंशयोच्छेदि परोक्षार्थस्य दर्शकम् ।
सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः ॥ १० ॥
यौवनं धन संपत्तिः प्रभुत्वमविवेकिता ।
एकैकमप्यनर्थाय किमु यत्र चतुष्टयम् ॥ ११ ॥'

इत्याकर्ण्यात्मनः पुत्राणामनधिगतशास्त्राणां नित्यमुन्मार्गगामिनां शास्त्राननुष्ठानेनोद्विग्नमनाः स राजा चिन्तयामास—

'कोऽर्थः पुत्रेण जातेन यो न विद्वान्न धार्मिकः ।
काणेन चक्षुषा किंवा चक्षुष्पीडैव केवलम् ॥ १२ ॥
अजात-मृत-मूर्खाणां वरमाद्यौ न चान्तिमः ।
सकृद्दुःखकरावाद्यावन्तिमस्तु पदेपदे ॥ १३ ॥
स जातो येन जातेन याति वंशः समुन्नतिम् ।
परिवर्तिनि संसारे मृतः को वा न जायते ॥ १४ ॥
गुणिगणगणनारम्भे न पतति कठिनी सुसंभ्रमाद् यस्य ।
तेनाम्बा यदि सुतिनी वद वन्ध्या कीदृशी नाम ॥ १५ ॥
दाने तपसि शौर्ये च यस्य न प्रथितं यशः ।
विद्यायामर्थलाभे च मातुरुच्चार एव सः ॥ १६ ॥
वरमेको गुणी पुत्रो न च मूर्खशतान्यपि ।
एकश्चन्द्रस्तमो हन्ति न च तारागणोऽपि च ॥ १७ ॥
पुण्यतीर्थे कृतं येन तपः क्वाप्यतिदुष्करम् ।
तस्य पुत्रो भवेद्वश्यः समृद्धो धार्मिकः सुधीः ॥ १८ ॥
अर्थागमो नित्यमरोगिता च प्रिया च भार्या प्रियवादिनी च ।
वश्यश्च पुत्रोऽर्थकरी च विद्या षड् जीवलोकस्य सुखानि राजन् ॥१९॥

[टीका पु० पृ० ४।४—७।२]

को धन्यो बहुभिः पुत्रैः कुशूलापूरणाढयकैः ।
वरमेकः कुलालम्बी यत्र विश्रूयते पिता ॥ २० ॥

यस्य कस्य प्रसूतोऽपि गुणवान्पूज्यते नरः ।
धनुर्वंशविशुद्धोऽपि निर्गुणः किं करिष्यति ॥ २१ ॥

हा हा पुत्रक नाधीतं सुगतैतासु रात्रिषु ।
तेन त्वं विदुषां मध्ये पङ्के गौरिव सीदसि ॥ २२ ॥

तत्कथमिदानीमेते मम पुत्रा गुणवन्तः क्रियन्ताम् । यतः—

आहारनिद्राभयतृड्बुभुक्षाः सामान्यमेतत्पशुभिर्नराणाम् ।
धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः ॥२३॥

धर्मार्थकाममोक्षाणां यस्यैकोऽपि न विद्यते ।
अजागलस्तनस्येव तस्य जन्म निरर्थकम् ॥ २४ ॥

आयुः कर्म च वित्तं च विद्या निधनमेव च ।
पञ्चैतान्यपि सृज्यन्ते गर्भस्थस्यैव देहिनः ॥ २५ ॥

अवश्यं भाविनो भावा भवन्ति महतामपि ।
नग्नत्वं नीलकण्ठस्य महाहिशयनं हरेः ॥ २६ ॥

यद्भावि न तद्भावि भावि चेन्न तदन्यथा ।
इति चिन्ताविषघ्नोऽयमगदः किं न पीयते ॥ २७ ॥

एतत्कार्याक्षमाणां केषांचिदालस्यवचनम् ।

न दैवमपि संचिन्त्य त्यजेदुद्योगमात्मनः ।
अनुद्योगेन तैलानि तिलेभ्यो नाप्तुमर्हति ॥ २८ ॥

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मी-
दैवेन देयमिति कापुरुषा वदन्ति ।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ॥ २९ ॥

[टीका पु० पृ० ७२—९।२]

यथाह्येकेन चक्रेण न रथस्य गतिर्भवेत् ।
एवं पुरुषकारेण विना दैवं न सिध्यति ॥ ३० ॥
पूर्वजन्मकृतं कर्म तद्दैवमिति कथ्यते ।
तस्मात्पुरुषकारेण यत्नं कुर्यादतन्द्रितः ॥ ३१ ॥
यथा मृत्पिण्डतः कर्ता कुरुते यद्यदिच्छति ।
एवमात्मकृतं कर्म मानवः प्रतिपद्यते ॥ ३२ ॥
काकतालीयवत्प्राप्तं दृष्ट्वापि निधिमग्रतः ।
न स्वयं दैवमादत्ते पुरुषार्थमपेक्षते ॥ ३३ ॥
उद्यमेन हि सिध्यन्ति कार्याणि न मनोरथैः ।
न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः ॥ ३४ ॥
मातापितृकृताभ्यासो गुणितामेति बालकः ।
न गर्भच्युतिमात्रेण पुत्रो भवति पण्डितः ॥ ३५ ॥
माता शत्रुः पिता वैरी येन बालो न पाठितः ।
न शोभते सभामध्ये हंसमध्ये बको यथा ॥ ३६ ॥
रूपयौवनसंपन्ना विशालकुलसंभवाः ।
विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः ॥ ३७ ॥
मूर्खोऽपि शोभते तावत्सभायां वस्त्रवेष्टितः ।
तावच्च शोभते मूर्खो यावत्किञ्चिन्न भाषते ॥ ३८ ॥"

एतच्चिन्तयित्वा स राजा पण्डितसभां कारितवान् ।

राजोवाच—'भोभोः पण्डिताः, श्रूयताम्—

"अस्ति कश्चिदेवंभूतो विद्वान्, यो मम पुत्राणां नित्यमुन्मार्गगामिनामनधिगतशास्त्राणामिदानीं नीतिशास्त्रोपदेशेन पुनर्जन्म कारयितुं समर्थः । यतः—

काचः काञ्चनसंसर्गाद्धत्ते मारकतीं द्युतिम् ।
तथा सत्संनिधानेन मूर्खो याति प्रवीणताम् ॥ ३९ ॥
हीयते हि मतिस्तात हीनैः सह समागमात् ।
समैश्च समतामेति विशिष्टैश्च विशिष्टताम् ॥ ४० ॥"

[टीका पु० पृ० ६।२--११।२]

अत्रान्तरे विष्णुशर्मनामा महापण्डितः सकलनीतिशास्त्रतत्त्वज्ञो बृहस्पतिरिवाब्रवीत्—'देव, महाकुलसंभूता एते राजपुत्राः। तन्मया नीतिं ग्राहयितुं शक्यन्ते। यतः—

नाद्रव्ये निहिता काचित्क्रिया फलवती भवेत्।
न व्यापारशतेनापि शुकवत्पाठ्यते बकः ॥४१॥
अस्मिंस्तु निर्गुणं गोत्रे नापत्यमुपजायते।
आकरे पद्मरागाणां जन्म काचमणेः कुतः ॥४२॥

अतोऽहं षण्मासाभ्यन्तरे तव पुत्रान्नीतिशास्त्राभिज्ञान् करिष्यामि।"

राजा सविनयं पुनरुवाच—

'कीटोऽपि सुमनःसङ्गादारोहति सतां शिरः।
अश्मापि याति देवत्वं महद्भिः सुप्रतिष्ठितः ॥४३॥
यथोदयगिरेर्द्रव्यं संनिकर्षेण दीप्यते।
तथा सत्संनिधानेन हीनवर्णोऽपि दीप्यते ॥४४॥
गुणा गुणज्ञेषु गुणा भवन्ति ते निर्गुणं प्राप्य भवन्ति दोषाः।
आस्वाद्यतोयाः प्रभवन्ति नद्यः समुद्रमासाद्य भवन्त्यपेयाः ॥४५॥

तदेतेषामस्मत्पुत्राणां नीतिशास्त्रोपदेशाय भवन्तः प्रमाणम्' इत्युक्त्वा तस्य विष्णुशर्मणो बहुमानपुरःसरं पुत्रान् समर्पितवान्।

अथ प्रासादपृष्ठे सुखोपविष्टानां राजपुत्राणां पुरस्तात्प्रस्तावक्रमेण स पण्डितोऽब्रवीत्—

'काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्।
व्यसनेन च मूर्खाणां निद्रया कलहेन वा ॥४६॥

तद्भवतां विनोदाय काककूर्मादीनां विचित्रां कथां कथयामि।'

राजपुत्रैरुक्तम्—'आर्य, कथ्यताम्।'

विष्णुशर्मोवाच—'शृणुत। संप्रति मित्रलाभः प्रस्तूयते।

[इति प्रस्तावना।]

[टीका पु० पृ० ११।३ — १३।२]

[अथ मित्रलाभः ।]

यस्यायमाद्यः श्लोकः—

असाधना वित्तहीना बुद्धिमन्तः सुहृत्तमाः
साधयन्त्याशु कार्याणि काककूर्ममृगाखुवत् ॥४७॥

राजपुत्रा ऊचुः—'कथमेतत् ।'

विष्णुशर्मा कथयति—

[१ काक-कूर्म-मृग-मूषक-कथा—]

'अस्ति गोदावरीतीरे विशालः शाल्मलीतरुः ॥

तत्र नानादिग्देशादागत्य रात्रौ पक्षिणो निवसन्ति ॥

अथ कदाचिदवसन्नायां रात्रावस्ताचलचूडावलम्बिनि भगवति कुमुदिनीनायके चन्द्रमसि लघुपतनकनामा वायसः प्रबुद्धः कृतान्तमिव द्वितीयमायान्तं व्याधमपश्यत् ॥

तमवलोक्याचिन्तयत्—'अद्य प्रातरेवानिष्टदर्शनं जातम् । न जाने [तत्] किमनभिमतं दर्शयिष्यति' इत्युक्त्वा तदनुसरणक्रमेण व्याकुलश्चलितः । यतः—

शोकस्थानसहस्राणि भयस्थानशतानि च ।
दिवसे दिवसे मूढमाविशन्ति न पण्डितम् ॥४८॥

अन्यच्च—विषयिणामिदमवश्यं कर्तव्यम्—

उत्थायोत्थाय बोद्धव्यं महद्भयमुपस्थितम् ।
मरणव्याधिशोकानां किमद्य निपतिष्यति ॥४९॥

अथ तेन व्याधेन तण्डुलकणान्विकीर्य जालं विस्तीर्णम् ।

स च प्रच्छन्नो भूत्वा स्थितः ।

तस्मिन्नेव काले चित्रग्रीवनामा कपोतराजः सपरिवारो वियति विसर्पंस्तांस्तण्डुलकणानवलोकयामास ।

ततः कपोतराजस्तण्डुलकणलुब्धान्कपोतान्प्रत्याह—'कुतोऽत्र निर्जने वने

[टीका पु० पृ० १३।२—१५।२]

तण्डुलकणानां संभवः । तन्निरूप्यतां तावत् । भद्रमिदं न पश्यामि । प्रायेणानेन तण्डुलकणलोभेनास्माभिरपि तथा भवितव्यम् ।

कङ्कणस्य तु लोभेन मग्नः पङ्के सुदुस्तरे ।
वृद्धव्याघ्रेण संप्राप्तः पथिकः स मृतो यथा ॥५०॥'

कपोता ऊचुः—'कथमेतत् ।'

सोऽब्रवीत्—

[२ कङ्कणलोभि पथिक मरण कथा—]

"अहमेकदा दक्षिणारण्ये चरन्नपश्यम्—

एको वृद्धव्याघ्रः स्नातः कुशहस्तः सरस्तीरे ब्रूते—

'भो भोः पान्थाः, इदं सुवर्णकङ्कणं गृह्यताम् ।'

ततो लोभाकृष्टेन केनचित्पान्थेनालोचितम्—'भाग्येनैतत्संभवति ।

किंत्वस्मिन्नात्मसंदेहे प्रवृत्तिर्न विधेया । यतः—

अनिष्टादिष्टलाभेऽपि न गतिर्जायते शुभा ।
यत्रास्ते विषसंसर्गोऽमृतं तदपि मृत्यवे ॥५१॥

किंतु सर्वत्रार्थार्जने प्रवृत्तिः संदेह एव । तथा चोक्तम्—

न संशयमनारुह्य नरो भद्राणि पश्यति ।
संशयं पुनरारुह्य यदि जीवति पश्यति ॥५२॥

तन्निरूपयामि तावत् ।'

प्रकाशं ब्रूते—'कुत्र तव कङ्कणम् ।'

व्याघ्रो हस्तं प्रसार्य दर्शयति ।

पान्थोऽवदत्—'कथं मारात्मके त्वयि विश्वासः ।'

व्याघ्र उवाच—"शृणु रे पान्थ, प्रागेव यौवनदशायामतिदुर्वृत्त आसम् ।

अनेकगोमानुषाणां वधान्मे पुत्रा मृता दाराश्च । वंशहीनश्चाहम् ।

ततः केनचिद्धार्मिकेणाहमादिष्टः—'दानधर्मादिकं चरतु भवान् ।'

तदुपदेशादिदानीमहं स्नानशीलो दाता वृद्धो गलितनखदन्तो न कथं विश्वासभूमिः । यतः—

[टीका पु० पृ० १५।२—१७।२]

इज्याध्ययनदानानि तपः सत्यं धृतिः क्षमा ।
अलोभ इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः ॥५३॥
तत्र पूर्वश्चतुर्वर्गो दम्भार्थमपि सेव्यते ।
उत्तरस्तु चतुर्वर्गो महात्मन्येव तिष्ठति ॥५४॥

मम चैतावांल्लोभविरहो येन स्वहस्तस्थमपि सुवर्णकङ्कणं यस्मै कस्मैचिद्दातुमिच्छामि । तथापि 'व्याघ्रो मानुषं खादति' इति लोकप्रवादो दुर्निवारः ।

मया च धर्मशास्त्राण्यधीतानि । शृणु—

मरुस्थल्यां यथा वृष्टिः क्षुधार्ते भोजनं तथा ।
दरिद्रे दीयते दानं सफलं पाण्डुनन्दन ॥५५॥
प्राणा यथात्मनोऽभीष्टा भूतानामपि ते तथा ।
आत्मौपम्येन भूतेषु दयां कुर्वन्ति साधवः ॥५६॥
प्रत्याख्याने च दाने च सुखदुःखे प्रियाप्रिये ।
आत्मौपम्येन पुरुषः प्रमाणमधिगच्छति ॥५७॥
मातृवत्परदारेषु परद्रव्येषु लोष्टवत् ।
आत्मवत्सर्वभूतेषु यः पश्यति स पण्डितः ॥५८॥

त्वं चातीव दुर्गतः । तेन तत्तुभ्यं दातुं सयत्नोऽहम् । तथा चोक्तम्—

दरिद्रान्भर कौन्तेय मा प्रयच्छेश्वरे धनम् ।
व्याधितस्यौषधं पथ्यं नीरुजस्य किमौषधैः ॥५९॥
दातव्यमिति यद्दानं दीयतेऽनुपकारिणे ।
देशे काले च पात्रे च तद्दानं सात्त्विकं विदुः ॥६०॥

[टीका पु० पृ० १७।२—१९।२]

तदत्र सरसि स्नात्वा सुवर्णकङ्कणं गृहाण।"

ततो यावदसौ तद्वचःप्रतीतो लोभात्सरः स्नातुं प्रविशति तावन्महापङ्के निमग्नः पलायितुमक्षमः।

पङ्के पतितं दृष्ट्वा व्याघ्रोऽवदत्—'अहह, महापङ्के पतितोऽसि। अतस्त्वामहमुत्थापयामि।' इत्युक्त्वा शनैः शनैरुपगम्य तेन व्याघ्रेण धृतः स पान्थोऽचिन्तयत्—

'न धर्मशास्त्रं पठतीति कारणं
न चापि वेदाध्ययनं दुरात्मनः।
स्वभाव एवात्र तथातिरिच्यते
यथा प्रकृत्या मधुरं गवां पयः॥ ६१॥

अवशेन्द्रियचित्तानां हस्तिस्नानमिव क्रिया।
दुर्भगाभरणप्रायो ज्ञानं भारः क्रियां विना॥ ६२॥

तन्मया भद्रं न कृतम्—'यदत्र मारात्मके विश्वासः कृतः। तथा ह्युक्तम्—

नदीनां शस्त्रपाणीनां नखिनां शृङ्गिणां तथा।
विश्वासो नैव कर्तव्यः स्त्रीषु राजकुलेषु च॥ ६३॥

सर्वस्य हि परीक्ष्यन्ते स्वभावा नेतरे गुणाः।
अतीत्य हि गुणान्सर्वान्स्वभावो मूर्ध्नि वर्तते॥ ६४॥

स हि गगनविहारी कल्मषध्वंसकारी
दशशतकरधारी ज्योतिषां मध्यचारी।
विधुरपि विधियोगाद् ग्रस्यते राहुणासौ
लिखितमधिललाटे प्रोज्झितुं कः समर्थः॥ ६५॥,

इति चिन्तयन्नेवासौ व्याघ्रेण व्यापादितः खादितश्च।

अतोऽहं ब्रवीमि—'कङ्कणस्य तु लोभेन' (५०) इत्यादि॥

[टीका पु० पृ० १६।२—२१।२]

अतः सर्वथाऽविचारितं कर्म न कर्तव्यम् । यतः—

सुजीर्णमन्नं सुविचक्षणः सुतः,
सुशासिता स्त्री नृपतिः सुसेवितः ।
सुचिन्त्य चोक्तं सुविचार्य यत्कृतं,
सुदीर्घकालेऽपि न याति विक्रियाम् ॥ ६६ ॥

तद्वचनं श्रुत्वा कश्चित्कपोतः सदर्पमाह—'आः, किमेवमुच्यते ।

वृद्धानां वचनं ग्राह्यमापत्काले ह्युपस्थिते ।
सर्वत्रैवं विचारेण भोजनेऽप्यप्रवर्तनम् ॥ ६७ ॥
शङ्काभिः सर्वमाक्रान्तमन्नं पानं च भूतले ।
प्रवृत्तिः कुत्र कर्तव्या जीवितव्यं कथं नु वा ॥ ६८ ॥
ईर्ष्यी घृणी त्वसंतुष्टः क्रोधनो नित्यशङ्कितः ।
परभाग्योपजीवी च षडेते दुःखभागिनः ॥ ६९ ॥"

एतच्छ्रुत्वा सर्वे कपोतास्तत्रोपविष्टाः । यतः—

सुमहान्त्यपि शास्त्राणि धारयन्तो बहुश्रुताः ।
छेत्तारः संशयानां च क्लिश्यन्ते लोभमोहिताः ॥ ७० ॥
लोभात्क्रोधः प्रभवति लोभात्कामः प्रजायते ।
लोभान्मोहश्च नाशश्च लोभः पापस्य कारणम् ॥ ७१ ॥

असंभवं हेममृगस्य जन्म तथापि रामो लुलुभे[1] मृगाय ।
प्रायः समापन्नविपत्तिकाले धियोऽपि पुंसां मलिना भवन्ति ॥ ७२ ॥

अनन्तरं सर्वे जालेन बद्धा बभूवुः ।

ततो यस्य वचनात्तत्रावलम्बितास्तं सर्वे तिरस्कुर्वन्ति । यतः—

न गणस्याग्रतो गच्छेत्सिद्धे कार्ये समं फलम् ।
यदि कार्यविपत्तिः स्यान्मुखरस्तत्र हन्यते ॥ ७३ ॥

तस्य तिरस्कारं श्रुत्वा चित्रग्रीव उवाच—'नायमस्य दोषः । यतः—

---

१ 'रामो नु लुभेन्मृगाय' इत्येव पाठः साधीयान् ॥ भुवादेरवृत्कृतत्वात् 'लोभते' इति भवतीत्यात्रेयः ॥

[टीका पु० पृ० २१।२—२३।२]

आपदामापतन्तीनां हितोऽप्यायाति हेतुताम्।
मातृजङ्घा हि वत्सस्य स्तम्भीभवति बन्धने ॥ ७४ ॥
स बन्धुर्यो विपन्नानामापदुद्धरणक्षमः।
न तु भीतपरित्राणवस्तूपालम्भपण्डितः ॥ ७५ ॥

विपत्काले विस्मय एव कापुरुषलक्षणम्। तदत्र धैर्यमवलम्ब्य प्रतीकारश्चिन्त्यताम्। यतः—

विपदि धैर्यम्, अथाभ्युदये क्षमा,
सदसि वाक्पटुता, युधि विक्रमः।
यशसि चाभिरुचिर्, व्यसनं श्रुतौ,
प्रकृतिसिद्धमिदं हि महात्मनाम् ॥ ७६ ॥
संपदि यस्य न हर्षो, विपदि विषादो, रणे च भीरुत्वम्।
तं भुवनत्रयतिलकं जनयति जननी सुतं विरलम् ॥ ७७ ॥
षड् दोषाः पुरुषेणेह हातव्या भूतिमिच्छता।
निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता ॥ ७८ ॥

इदानीमप्येवं क्रियताम्—सर्वैरेकचित्तीभूय जालमादायोड्डीयताम्। यतः—

अल्पानामपि वस्तूनां संहतिः कार्यसाधिका।
तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः ॥ ७९ ॥
संहतिः श्रेयसी पुंसां स्वकुलैरल्पकैरपि।
तुषेणापि परित्यक्ता न प्ररोहन्ति तण्डुलाः ॥ ८० ॥'

इति विचिन्त्य पक्षिणः सर्वे जालमादायोत्पतिताः।

अनन्तरं स व्याधः सुदूराज्जालापहारकांस्तानवलोक्य पश्चाद्धावन्नचिन्तयत्—

'संहतास्तु हरन्तीमे जालं मम विहङ्गमाः।
यदा तु निपतिष्यन्ति वशमेष्यन्ति मे तदा ॥ ८१ ॥"

ततस्तेषु चक्षुर्विषयातिक्रान्तेषु पक्षिषु स व्याधो निवृत्तः।

[टीका पु० पृ० २३।२।२५।३]

अथ लुब्धकं निवृत्तं दृष्ट्वा कपोता ऊचुः—'किमिदानीं कर्तुमुचितम्।'

चित्रग्रीव उवाच—

"माता मित्रं पिता चेति स्वभावात्त्रितयं हितम्।
कार्यकारणतश्चान्ये भवन्ति हितबुद्धयः॥ ८२॥

तदस्माकं मित्रं हिरण्यको नाम मूषकराजो गण्डकीतीरे चित्रवने निवसति। सोऽस्माकं पाशांश्छेत्स्यति।"

इत्यालोच्य सर्वे हिरण्यकविवरसमीपं गताः।

हिरण्यकश्च सर्वदापायशङ्कया शतद्वारं विवरं कृत्वा निवसति।

ततो हिरण्यकः कपोतावपातभयाच्चकितस्तूष्णीं स्थितः।

चित्रग्रीव उवाच—'सखे हिरण्यक, किमस्मान्न संभाषसे।'

ततो हिरण्यकस्तद्वचनं प्रत्यभिज्ञाय ससंभ्रमं बहिर्निःसृत्याब्रवीत्—'आः, पुण्यवानस्मि। प्रियसुहृन्मे चित्रग्रीवः समायातः।

यस्य मित्रेण संभाषा यस्य मित्रेण संस्थितिः।
यस्य मित्रेण संलापस्ततो नास्तीह पुण्यवान्॥ ८३॥"

पाशबद्धांश्चैतान्दृष्ट्वा सविस्मयः क्षणं स्थितश्रोवाच—'सखे, किमेतत्।'

चित्रग्रीवोऽवदत्—'सखे, अस्माकं प्राक्तनजन्मकर्मणः फलमेतत्।

यस्माच्च येन च यथा च यदा च यच्च
यावच्च यत्र च शुभाशुभमात्मकर्म।
तस्माच्च तेन च तथा च तदा च तच्च
तावच्च तत्र च विधातृवशादुपैति॥ ८४॥

रोग-शोक-परीताप-बन्धन-व्यसनानि च।
आत्मापराधवृक्षाणां फलान्येतानि देहिनाम्॥ ८५॥"

एतच्छ्रुत्वा हिरण्यकश्चित्रग्रीवस्य बन्धनं छेत्तुं सत्वरमुपसर्पति।

चित्रग्रीव उवाच—'मित्र, मामैवम्। अस्मदाश्रितानामेषां तावत्पाशांश्छिन्धि, तदा मम पाशं पश्चाच्छेत्स्यसि।'

हिरण्यकोऽप्याह—'अहमल्पशक्तिः। दन्ताश्च मे कोमलाः। तदेतेषां

[टीका पु० पृ० २५।३—२७।३]

पाशांश्छेत्तुं कथं समर्थः। तद्यावन्मे दन्ता न त्रुट्यन्ति, तावत्तव पाशं छिनद्मि। तदनन्तरमेषामपि बन्धनं यावच्छक्यं छेत्स्यामि।"

चित्रग्रीव उवाच—'अस्त्वेवम्। तथापि यथाशक्त्येतेषां बन्धनं खण्डय॥"

हिरण्यकेनोक्तम्—आत्मपरित्यागेन यदाश्रितानां परिरक्षणं तन्न नीतिविदां संमतम्। यतः—

आपदर्थं धनं रक्षेद्दारान् रक्षेद्धनैरपि।
आत्मानं सततं रक्षेद्दारैरपि धनैरपि॥ ८६॥

धर्मार्थकाममोक्षाणां प्राणाः संस्थितिहेतवः।
तान्निघ्नता किं न हतं, रक्षता किं न रक्षितम्॥ ८७॥"

चित्रग्रीव उवाच—'सखे, नीतिस्तावदीदृश्येव। किं त्वहमस्मदाश्रितानां दुःखं सोढुं सर्वथाऽसमर्थः। तेनेदं ब्रवीमि। यतः—

धनानि जीवितं चैव परार्थे प्राज्ञ उत्सृजेत्।
सन्निमित्ते वरं त्यागो विनाशे नियते सति॥ ८८॥

अयमपरश्चासाधारणो हेतुः—

जातिद्रव्यगुणानां च साम्यमेषां मया सह।
मत्प्रभुत्वफलं ब्रूहि कदा किं तद्भविष्यति॥ ८९॥

विना वर्तनमेवैते न त्यजन्ति ममान्तिकम्।
तन्मे प्राणव्ययेनापि जीवयैतान्ममाश्रितान्॥ ९०॥

मांसमूत्रपुरीषास्थिनिर्मितेऽस्मिन्कलेवरे।
विनश्वरे विहायास्थां यशः पालय मित्र मे॥ ९१॥

अपरं च पश्य—

यदि नित्यमनित्येन निर्मलं मलवाहिना।
यशः कायेन लभ्येत तन्न लब्धं भवेन्नु किम्॥ ९२॥

[टीका पु० पृ० २७।३—२८।३]

यतः—

शरीरस्य गुणानां च दूरमत्यन्तमन्तरम् ।
शरीरं क्षणविध्वंसि कल्पान्तस्थायिनो गुणाः ॥ ९३ ॥'

इत्याकर्ण्य हिरण्यकः प्रहृष्टमनाः पुलकितः सन्नब्रवीत्—'साधु मित्र साधु । अनेनाश्रितवात्सल्येन त्रैलोक्यस्यापि प्रभुत्वं त्वयि युज्यते ।' एवमुक्त्वावा तेन सर्वेषां बन्धनानि छिन्नानि ।

ततो हिरण्यकः सर्वान् सादरं संपूज्याह—'सखे चित्रग्रीव, सर्वथात्र जालबन्धनविधौ दोषमाशङ्क्यात्मन्यवज्ञा न कर्तव्या । यतः—

योऽधिकाद योजनशतात्पश्यतीहामिषं खगः ।
स एव प्राप्तकालस्तु पाशबन्धं न पश्यति ॥ ९४ ॥

शशिदिवाकरयोर्ग्रहपीडनं
गजभुजङ्गमयोरपि बन्धनम् ।
मतिमतां च विलोक्य दरिद्रतां
विधिरहो बलवानिति मे मतिः ॥ ९५ ॥

व्योमैकान्तविहारिणोऽपि विहगाः संप्राप्नुवन्त्यापदं,
बध्यन्ते निपुणैरगाधसलिलान्मत्स्याः समुद्रादपि ।
दुर्नीतं किमिहास्ति किं सुचरितं कः स्थानलाभे गुणः,
कालो हि व्यसनप्रसारितकरो गृह्णाति दूरादपि ॥ ९६ ॥

इति प्रबोध्यातिथ्यं कृत्वालिङ्ग्य च चित्रग्रीवस्तेन संप्रेषितो यथेष्टदेशान् सपरिवारो ययौ ।

हिरण्यकोऽपिस्वविवरं प्रविष्टः ।

यानि कानि च मित्राणि कर्तव्यानि शतानि च ।
पश्यमूषिकमित्रेण कपोता मुक्तबन्धनाः ॥ ९७ ॥

अथ लघुपतनकनामा काकः सर्ववृत्तान्तदर्शी साश्चर्यमिदमाह—'अहो हिरण्यक श्लाघ्योऽसि । अतोऽहमपि त्वया सह मैत्रीमिच्छामि । अतो मां

[टीका पु० पृ० २६।३—३१।३]

मैत्र्येणानुग्रहीतुमर्हसि ।'

एतच्छ्रुत्वा हिरण्यकोऽपि विवराभ्यन्तरादाह—'कस्त्वम् ।'

स ब्रूते—'लघुपतनकनामा वायसोऽहम् ।'

हिरण्यको विहस्याह—'का त्वया सह मैत्री । यतः—

यद्येन युज्यते लोके बुधस्तत्तेन योजयेत् ।
अहमन्नं भवान्भोक्ता कथं प्रीतिर्भविष्यति ॥ ६८ ॥
भक्ष्यभक्षकयोः प्रीतिर्विपत्तेरेव कारणम् ।
शृगालात्पाशबद्धोऽसौ मृगः काकेन रक्षितः ॥६९॥'

वायसोऽब्रवीत्—'कथमेतत् ।'

हिरण्यकः कथयति—

[३—काकरक्षितमृग—कथा—]

"अस्ति मगधदेशे चम्पकवती नामारण्यानी । तस्यां चिरान्महता स्नेहेन मृगकाकौ निवसतः ।

स च मृगः स्वेच्छया भ्राम्यन्हृष्टपुष्टाङ्गः केनचिच्छृगालेनावलोकितः । तं दृष्ट्वा शृगालोऽचिन्तयत्—'आः, कथमेतन्मांसं सुललितं भक्षयामि । भवतु । विश्वासं तावदुत्पादयामि ।'

इत्यालोच्योपसृत्याब्रवीत्—'मित्र, कुशलं ते ।'

मृगेणोक्तम्—'कस्त्वम् ।'

स ब्रूते—'क्षुद्रबुद्धिनामा जम्बुकोऽहम् । अत्रारण्ये बन्धुहीनो मृतवन्निवसामि । इदानीं त्वां मित्रमासाद्य पुनः सबन्धुर्जीवलोकं प्रविष्टोऽस्मि। अधुना तवानुचरेण मया सर्वथा भवितव्यम् ।'

मृगेणोक्तम्—'एवमस्तु ।'

ततः पश्चादस्तंगते सवितरि भगवति मरीचिमालिनि तौ मृगस्य वासभूमिं गतौ ।

तत्र चम्पकवृक्षशाखायां सुबुद्धि नामा काको मृगस्य चिरमित्रं निवसति । तौ दृष्ट्वा काकोऽवदत्—'सखे चित्राङ्ग, कोऽयं द्वितीयः ।'

[टीका पु० पृ० ३१।३—३३।३]

मृगो ब्रूते—'जम्बूकोऽयम्। अस्मत्सख्यमिच्छन्नागतः।'

काको ब्रूते—'मित्र, अकस्मादागन्तुना सह मैत्री न युक्ता। तथा-चोक्तम्।

अज्ञातकुलशीलस्य वासो देयो न कस्यचित्।
मार्जारस्य हि दोषेण हतो गृध्रो जरद्गवः॥ १००॥

तावाहतुः—'कथमेतत्।'

काकः कथयति—

[४ जरद्गवगृध्र कथा—]

"अस्ति भागीरथीतीरे गृध्रकूटनाम्नि पर्वते महान्पर्कटी-वृक्षः। तस्य कोटरे दैवदुर्विपाकाद्गलितनखनयनो जरद्गवनामा गृध्रः प्रतिवसति। अथ कृपया तज्जीवनाय तद्वृक्षवासिनः पक्षिणः स्वाहारात् किंचित् किंचिदुद्धृत्य ददति। तेनासौ जीवति। पक्षिशावकानां रक्षणं च करोति।

अथ कदाचिद्दीर्घकर्णो नामा मार्जारः पक्षिशावकान्भक्षयितुं तत्रागतः। ततस्तमायान्तं दृष्ट्वा पक्षिशावकैर्भयार्तैः कोलाहलः कृतः। तच्छ्रुत्वा जरद्गवेनोक्तम्—'कोऽयमायाति।'

दीर्घकर्णो गृध्रमवलोक्य सभयमाह—"हा हतोऽस्मि। अधुनाऽस्य संनिधाने पलायितुमक्षमः। तद्यथा भवितव्यं तद्भवतु। तावद्विश्वासमुत्पाद्यास्य समीपमुपगच्छामि। यतः—

तावद्भयस्य भेतव्यं यावद्भयमनागतम्।
आगतं तु भयं वीक्ष्य नरः कुर्याद्यथोचितम्॥ १०१॥"

इत्यालोच्योपसृत्याब्रवीत्—'आर्य, त्वामभिवन्दे।'

गृध्रोऽवदत्—'कस्त्वम्।'

सोऽवदत्—'मार्जारोऽहम्।'

गृध्रोब्रूते—'दूरमपसर। नो चेद्धन्तव्योऽसि मया।'

मार्जारोऽवदत्—'श्रूयतां तावदस्मद्वचनम्। ततो यद्यहं वध्यस्तदा हन्तव्यः। यतः—

[टीका पु० पृ० ३३।३—३५।३]

जातिमात्रेण किं कश्चिद्धन्यते पूज्यते क्वचित् ।
व्यवहारं परिज्ञाय वध्यः पूज्योऽथवा भवेत् ॥ १०२ ॥

गृध्रो ब्रूते—'ब्रूहि, किमर्थमागतोऽसि ।'

सोऽवदत्—'अहमत्र गङ्गातीरे नित्यस्नायी निरामिषो ब्रह्मचारी चान्द्रायणव्रतमाचरंस्तिष्ठामि । 'यूयं धर्मज्ञानरताः' इति विश्वासभूमयः पक्षिणः सर्वे सर्वदा ममाग्रे प्रस्तुवन्ति । अतो भवद्भ्यो विद्यावयोवृद्धेभ्यो धर्मं श्रोतुमहमिहागतः । भवन्तश्चैतादृशा धर्मज्ञा यन्मामतिथिं हन्तुमुद्यताः । गृहस्थधर्मश्चैषः—

अरावप्युचितं कार्यमातिथ्यं गृहमागते ।
छेत्तुः पार्श्वगतां छायां नोपसंहरते द्रुमः ॥ १०३ ॥

यदि चान्नं नास्ति, तदा प्रीतिवचसाप्यतिथिः पूज्य एव । यतः—

तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता ।
एतान्यपि सतां गेहे नोच्छिद्यन्ते कदाचन ॥ १०४ ॥
निर्गुणेष्वपि सत्त्वेषु दयां कुर्वन्ति साधवः ।
न हि संहरते ज्योत्स्नां चन्द्रश्चाण्डालवेश्मनः ॥ १०५ ॥
गुरुरग्निर्द्विजातीनां वर्णानां ब्राह्मणो गुरुः ।
पतिरेको गुरुः स्त्रीणां सर्वस्याभ्यागतो गुरुः ॥ १०६ ॥
अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्तते ।
स तस्मै दुष्कृतं दत्त्वा पुण्यमादाय गच्छति ॥ १०७ ॥
उत्तमस्यापि वर्णस्य नीचोऽपि गृहमागतः ।
पूजनीयो यथायोग्यं सर्वदेवमयोऽतिथिः ॥ १०८ ॥'

गृध्रोऽवदत्—"मार्जारो हि मांसरुचिः । पक्षिशावकाश्चात्र निवसन्ति । तेनाहमेवं ब्रवीमि ।"

तच्छ्रुत्वा मार्जारो भूमिं स्पृष्ट्वा कर्णौ स्पृशति । ब्रूते च—मया धर्मशास्त्रं श्रुत्वा वीतरागेणेदं दुष्करं व्रतं चान्द्रायणमध्यवसितम् । यतः परस्परं

[टीका पु० पृ० ३५।३—३७।२]

विवदमानानामपि धर्मशास्त्राणाम् 'अहिंसा परमो धर्मः' इत्यत्रैकमत्यम्। यतः—

सर्वहिंसानिवृत्ता ये नराः सर्वसहाश्च ये।
सर्वस्याश्रयभूताश्च ते नराः स्वर्गगामिनः ॥ १०९ ॥
एक एव सुहृद्धर्मो निधनेऽप्यनुयाति यः।
शरीरेण समं नाशं सर्वमन्यत्तु गच्छति ॥ ११० ॥
योऽत्ति यस्य यदा मांसमुभयोः पश्यतान्तरम्।
एकस्य क्षणिका प्रीतिरन्यः प्राणैर्विमुच्यते ॥१११॥
मर्तव्यमिति यद्दुःखं पुरुषस्योपजायते।
शक्यस्तेनानुमानेन परोऽपि परिरक्षितुम् ॥११२॥

शृणु पुनः—

स्वच्छन्दवनजातेन शाकेनापि प्रपूर्यते।
अस्य दग्धोदरस्यार्थे कः कुर्यात्पातकं महत् ॥११३॥"

एवं विश्वास्य स **मार्जारस्तरुकोटरे** स्थितः। ततो दिनेषु गच्छत्सु पक्षिशावकानाक्रम्य कोटरमानीय प्रत्यहं खादति। येषामपत्यानि खादितानि तैः शोकार्तैर्विलपद्भिरितस्ततो जिज्ञासा समारब्धा।

तत्परिज्ञाय **मार्जारः** कोटरान्निःसृत्य बहिः पलायितः। पश्चात्पक्षिभिरितस्ततो निरूपयद्भिस्तत्र तरुकोटरे शावकास्थीनि प्राप्तानि। अनन्तरम् 'अनेनैव जरद्गवेनास्माकं शावकाः खादिता' इति सर्वैः **पक्षिभिर्निश्चित्य** गृध्रो व्यापादितः।

अतोऽहं ब्रवीमि—'**अज्ञातकुलशीलस्य १००**' इत्यादि ॥

इत्याकर्ण्य स **जम्बुकः** सकोपमाह—'मृगस्य प्रथमदर्शनदिने भवानप्यज्ञातकुलशील एव। तत्कथं भवता सहैतस्य स्नेहानुवृत्तिरुत्तरोत्तरं वर्धते।

[टीका पु० पृ० ३७।२—३८।३]

यत्र विद्वज्जनो नास्ति श्लाघ्यस्तत्राल्पधीरपि ।
निरस्तपादपे देशे एरण्डोऽपि द्रुमायते ॥ ११४ ॥
अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानां तु वसुधैव कुटुम्बकम् ॥ ११५ ॥

अतो यथायं मृगो मम बन्धुस्तथा ‘भवानपि ।’

मृगोऽब्रवीत्—‘किमनेनोत्तरोत्तरेण । सर्वैरेकत्र विश्रम्भालापैः सुखिभिः स्थीयताम् । यतः—

न कश्चित्कस्यचिन्मित्रं न कश्चित्कस्यचिद्रिपुः ।
व्यवहारेण मित्राणि जायन्ते रिपवस्तथा ॥ ११६ ॥”

काकेनोक्तम्—‘एवमस्तु ।’

अथ प्रातः सर्वे यथाभिमतं देशं गताः ।

एकदा निभृतं शृगालो ब्रूते ‘सखे मृग, अस्मिन्वनैकदेशे सस्यपूर्णं क्षेत्रमस्ति । तदहं त्वां नीत्वा दर्शयामि ।’

तथा कृते सति स मृगः प्रत्यहं तत्र गत्वा सस्यं खादति ।

अथ क्षेत्रपतिना तद्दृष्ट्वा पाशस्तत्र नियोजितः ।

अनन्तरं पुनरागतो मृगः पाशैर्बद्धोऽचिन्तयत्—

‘को मामितः कालपाशादिव व्याधपाशात्त्रातुं मित्रादन्यः समर्थः ।”

तत्रान्तरे जम्बुकस्तत्रागत्योपस्थितोऽचिन्तयत्—‘फलिता तावदस्माकं कपटप्रबन्धेन मनोरथसिद्धिः । एतस्योत्कृत्यमानस्य मांसासृग्लिप्तान्यस्थीनि मयावश्यं प्राप्तव्यानि । तानि बाहुल्येन भोजनानि भविष्यन्ति ।”

मृगस्तं दृष्ट्वोल्लासितो ब्रूते—‘सखे शृगाल, छिन्धि तावन्मम बन्धनम् सत्वरं त्रायस्व माम् । यतः—

आपत्सु मित्रं जानीयाद्, युद्धे शूरमृणे शुचिम् ।
भार्यां क्षीणेषु वित्तेषु, व्यसनेषु च बान्धवान् ॥११७॥
उत्सवे व्यसने चैव दुर्भिक्षे राष्ट्रविप्लवे ।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ॥११८॥”

[टीका पु० पृ० ३६।३—४१।३]

जम्बुको मुहुर्मुहुः पाशं विलोक्याचिन्तयत् 'दृढस्तावदयं बन्धः।" ब्रूते च—'सखे, स्नायुनिर्मिता एते पाशाः। तदद्य भट्टारकवारे कथमेतान्दन्तैः स्पृशामि। मित्र नान्यथा मन्तव्यम्, प्रभाते यत्त्वया वक्तव्यं तन्मया कर्तव्यमेव' इत्युक्त्वा तत्समीप आत्मानमाच्छाद्य स्थितः (सः)। अनन्तरं स काकः प्रदोषकाले मृगमनागतमवलोक्येतस्ततोऽन्विष्यंस्तं तथाविधं दृष्ट्वोवाच—'सखे, किमेतत्।"

मृगेणोक्तम् 'अवधीरितसुहृद्वाक्यफलमेतत्। तथा चोक्तम्—

सुहृदां हितकामानां यः शृणोति न भाषितम्।
विपत्संनिहिता तस्य स नरः शत्रुनन्दनः॥११९॥"

काको ब्रूते "स वञ्चकः क्वास्ते।"

मृगेणोक्तम् "मन्मांसार्थी तिष्ठत्यत्रैव॥"

काको ब्रूते 'उक्तमेव मया पूर्वम्,

अपराधो न मेऽस्तीति नैतद्विश्वासकारणम्।
विद्यते हि नृशंसेभ्यो भयं गुणवतामपि॥१२०॥

दीपनिर्वाणगन्धं च सुहृद्वाक्यमरुन्धतीम्।
न जिघ्रन्ति न शृण्वन्ति न पश्यन्ति गतायुषः॥१२१॥

परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम्।
वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम्॥१२२॥"

ततः काको दीर्घं निःश्वस्य 'अरे वञ्चक किं त्वया पापकर्मणा कृतम्। यतः—

संलापितानां मधुरैर्वचोभि-
र्मिथ्योपचारैश्च वशीकृतानाम्।
आशावतां श्रद्दधतां च लोके
किमर्थिनां वञ्चयितव्यमस्ति॥१२३॥

उपकारिणि विश्रब्धे शुद्धमतौ यः समाचरति पापम्।
तं जनमसत्यसन्धं भगवति वसुधे कथं वहसि॥१२४॥

[टीका पु० पृ० ४१।३—४३।३]

दुर्जनेन समं वैरं प्रीतिं चापि न कारयेत् ।
उष्णो दहति चाङ्गारः शीतः कृष्णायते करम् ॥ १२५ ॥

अथवा स्थितिरियं दुर्जनानाम्—

प्राक्पादयोः पतति खादति पृष्ठमांसं
कर्णे कलं किमपि रौति शनैर्विचित्रम् ।
छिद्रं निरूप्य सहसा प्रविशत्यशङ्कः
सर्वं खलस्य चरितं मशकः करोति ॥ १२६ ॥

दुर्जनः प्रियवादी च नैतद्विश्वासकारणम् ।
मधु तिष्ठति जिह्वाग्रे हृदि हालाहलं विषम् ॥ १२७ ॥'

अथ प्रभाते क्षेत्रपतिर्लगुडहस्तस्तं प्रदेशमागच्छन् काकेनावलोकितः । तमालोक्य काकेनोक्तम्—'सखे मृग, त्वमात्मानं मृतवत्संदर्श्य वातेनोदरं पूरयित्वा पादान्स्तब्धीकृत्य तिष्ठ । यदाऽहं शब्दं करोमि तदा त्वमुत्थाय सत्वरं पलायिष्यसे ।''

मृगस्तथैव काकवचनेन स्थितः ।

ततः क्षेत्रपतिना हर्षोत्फुल्ललोचनेन तथाविधो मृग आलोकितः । आलोक्य चासौ 'आः, स्वयं मृतोऽसि' इत्युक्त्वा मृगं बन्धनान्मोचयित्वा पाशान्ग्रहीतुं सयत्नो बभूव ।

[ततःकाकः शब्दमकरोत् ।]

ततः काकशब्दं श्रुत्वा मृगः सत्वरमुत्थाय पलायितः । तमुद्दिश्य तेन क्षेत्रपतिना क्षिप्तेन लगुडेन शृगालो हतः । पञ्चत्वं गतः ॥

तथा चोक्तम्—

त्रिभिर्वर्षैस्त्रिभिर्मासैस्त्रिभिः पक्षैस्त्रिभिर्दिनैः ।
अत्युग्रपुण्यपापानामिहैव फलमश्नुते ॥ १२८ ॥

अतोऽहं ब्रवीमि—'भक्ष्यभक्षकयोः प्रीतिः ९९' इत्यादि ॥

काकःपुनराह—

'भक्षितेनापि भवता नाहारो मम पुष्कलः ।
त्वयि जीवति जीवामि चित्रग्रीव इवानघ ॥ १२९ ॥

[टीका पु० पृ० ४३।३—४५।२]

तिरश्चामपि विश्वासो दृष्टः पुण्यैककर्मणाम् ।
सतां हि साधुशीलत्वात्स्वभावो न निवर्तते ॥ १३० ॥
साधोः प्रकोपितस्यापि मनो नायाति विक्रियाम् ।
न हि तापयितुं शक्यं सागराम्भस्तृणोल्कया ॥ १३१ ॥"

हिरण्यको ब्रूते—'चपलस्त्वम् । चपलेन सह स्नेहः सर्वथा न कर्तव्यः । तथा चोक्तम्—

मार्जारो महिषो मेषः काकः कापुरुषस्तथा ।
विश्वासात्प्रभवन्त्येते विश्वासस्तत्र नोचितः ॥ १३२ ॥

किंचान्यत्—शत्रुपक्षो भवानस्माकम् । शत्रुणा च संधिर्नैव करणीयः । उक्तं चैतत्—

शत्रुणा न हि संदध्यात्सुश्लिष्टेनापि सन्धिना ।
सुतप्तमपि पानीयं शमयत्येव पावकम् ॥ १३३ ॥
दुर्जनः परिहर्तव्यो विद्ययाऽलङ्कृतोऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयङ्करः ॥ १३४ ॥
यदशक्यं न तच्छक्यं यच्छक्यं शक्यमेव तत् ।
नोदके शकटं याति न च नौर्गच्छति स्थले ॥ १३५ ॥
महताऽप्यर्थसारेण यो विश्वसिति शत्रुषु ।
भार्यासु च विरक्तासु तदन्तं तस्य जीवनम् ॥ १३६ ॥"

लघुपतनको ब्रूते 'श्रुतं मया सर्वम् । तथापि मम चैतावान्सङ्कल्पः—'त्वया सह सौहार्दमवश्यं करणीयम्' इति । नो चेदनाहारेणात्मानं तव द्वारि व्यापादयिष्यामि । तथा हि—

मृद्घटवत्सुखभेद्यो दुःसंधानश्च दुर्जनो भवति ।
सुजनस्तु कनकघटवद्दुर्भेद्यश्चाशु संधेयः ॥ १३७ ॥

[टीका पु० पृ० ४५।२—४७।३]

द्रवत्वात्सर्वलोहानां निमित्तान्मृगपक्षिणाम् ।
भयाल्लोभाच्च मूर्खाणां संगतं दर्शनात्सताम् ॥ १३८ ॥

अन्यच्चैतज्ज्ञात्वा सतां संगतमिष्यते । यतः—

नारिकेलसमाकारा दृश्यन्ते हि सुहृज्जनाः ।
अन्ये बदरिकाकारा बहिरेव मनोहराः ॥ १३९ ॥
स्नेहच्छेदेऽपि साधूनां गुणा नायान्ति विक्रियाम् ।
भङ्गेऽपि हि मृणालानामनुबध्नन्ति तन्तवः ॥ १४० ॥

अन्यच्च शृणु—

शुचित्वं त्यागिता शौर्यं सामान्यं सुखदुःखयोः ।
दाक्षिण्यं चानुरक्तिश्च सत्यता च सुहृद्गुणाः ॥ १४१ ॥

एतैर्गुणैरुपेतो भवदन्यो मया कः सुहृत्प्राप्तव्यः ।"
इत्यादि तद्वचनमाकर्ण्य हिरण्यको बहिर्निःसृत्याह—'आप्यायितोऽहं भवताऽनेन वचनामृतेन । तथा चोक्तम्—

घर्मार्तं न तथा सुशीतलजलैः स्नानं न मुक्तावली
न श्रीखण्डविलेपनं सुखयति प्रत्यङ्गमप्यर्पितम् ।
प्रीत्या सज्जनभाषितं प्रभवति प्रायो यथा चेतसः
सद्युक्त्या च पुरस्कृतं सुकृतिनामाकृष्टिमन्त्रोपमम् ॥ १४२ ॥

रहस्यभेदो याच्ञा च नैष्ठुर्यं चलचित्तता ।
क्रोधो निःसत्यता द्यूतमेतन्मित्रस्य दूषणम् ॥ १४३ ॥

अनेन वचनक्रमेण तदेकदूषणमपि त्वयि न लक्ष्यते । यतः—

पटुत्वं सत्यवादित्वं कथायोगेन बुध्यते ।
अस्तब्धत्वमचापल्यं प्रत्यक्षेणावगम्यते ॥ १४४ ॥
अन्यथैव हि सौहार्दं भवेत्स्वच्छान्तरात्मनः ।
प्रवर्ततेऽन्यथा वाणी शाठ्योपहितचेतसः ॥ १४५ ॥

[टीका पु० पृ० ४७।३—४६।१]

मनस्यन्यद्वचस्यन्यत्कर्मण्यन्यद्दुरात्मनाम् ।
मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम् ॥ १४६ ॥

तद्भवतु भवतोऽभिमतमेव ।', इत्युक्त्वा हिरण्यको मैत्र्यं विधाय भोजनविशेषैर्वायसं संतोष्य विवरं प्रविष्टः ।

वायसोऽपि स्वस्थानं गतः ।

ततः प्रभृति प्रत्यहं तयोरन्योन्याहारप्रदानेन कुशलप्रश्नैर्विश्रम्भालापैश्च कालोऽतिवर्तते ।

एकदा लघुपतनको हिरण्यकमाह—'सखे, कष्टतरलभ्याहारमिदं स्थानम् । तदेतत्परित्यज्य स्थानान्तरं गन्तुमिच्छामि ।"

हिरण्यको ब्रूते—'मित्र, क्व गन्तव्यम् । तथा चोक्तम्—

स्थानभ्रष्टा न शोभन्ते दन्ताः केशा नखा नराः ।
इति विज्ञाय मतिमान्स्वस्थानं न परित्यजेत् ॥ १४७ ॥"

काको ब्रूते—'मित्र कापुरुषस्य वचनमेतत् ॥ यतः—

स्थानमुत्सृज्य गच्छन्ति सिंहाः सत्पुरुषा गजाः ।
तत्रैव निधनं यान्ति काकाः कापुरुषाः मृगाः ॥ १४८ ॥

को वीरस्य मनस्विनः स्वविषयः को वा विदेशस्तथा
यं देशं श्रयते तमेव कुरुते बाहुप्रतापार्जितम् ।
यद्दंष्ट्रानखलाङ्गुलप्रहरणः सिंहो वनं गाहते
तस्मिन्नेव हतद्विपेन्द्ररुधिरैस्तृष्णां छिनत्त्यात्मनः ॥ १४९ ॥"

हिरण्यकोऽब्रवीत्—

'चलत्येकेन पादेन तिष्ठत्येकेन बुद्धिमान् ।
नासमीक्ष्य परं स्थानं पूर्वमायतनं त्यजेत् ॥ १५० ॥'

वायसो ब्रूते—'अस्ति सुनिरूपितं स्थानम् ।"

हिरण्यकोऽवदत्—किं तत् ।"

[टीका पु० पृ० ४६।१—५१।१]

वायसो ब्रूते—'अस्ति दण्डकारण्ये कर्पूरगौराभिधानं सरः ।
तत्र चिरकालोपार्जितः प्रियसुहृन्मे मन्थराभिधानः कच्छपो धार्मिकः
प्रतिवसति । यतः—

परोपदेशे पाण्डित्यं सर्वेषां सुकरं नृणाम् ।
धर्मे स्वीयमनुष्ठानं कस्यचित्तु महात्मनः ॥ १५१

स च भोजनविशेषैर्मां संवर्धयिष्यति ।"
हिरण्यकोऽप्याह—'तत्किमत्रावस्थाय मया कर्तव्यम् । यतः—

यस्मिन्देशे न सम्मानो न वृत्तिर्न च बान्धवः ।
न च विद्यागमः कश्चित्तं देशं परिवर्जयेत् ॥ १५२ ॥
लोकयात्रा भयं लज्जा दाक्षिण्यं त्यागशीलता ।
पञ्च यत्र न विद्यन्ते न कुर्यात्तत्र संस्थितिम् ॥ १५३ ॥
तत्र मित्र न वस्तव्यं यत्र नास्ति चतुष्टयम् ।
ऋणदाता च वैद्यश्च श्रोत्रियः सजला नदी ॥ १५४ ॥

ततो मामपि तत्र नय ।"
अथ वायसस्तत्र तेन मित्रेण सह विचित्रकथालापैः सुखेन तस्य
सरसः समीपं ययौ ।
ततो मन्थरो दूरादवलोक्य लघुपतनकस्य यथोचितमातिथ्यं विधाय
मूषिकस्यातिथिसत्कारं चकार । यतः—

बालो वा यदि वा वृद्धो युवा वा गृहमागतः ।
तस्य पूजा विधातव्या सर्वत्राभ्यागतो गुरुः ॥ १५५ ॥

वायसोऽवदत्—'सखे मन्थर सविशेषपूजामस्मै विधेहि । यतोऽयं
पुण्यकर्मणां धुरीणः कारुण्यरत्नाकरो हिरण्यकनामा मूषिकराजः ।
एतस्य गुणस्तुतिं जिह्वासहस्रद्वयेनापि सर्पराजः कदाचित्कथयितुं समर्थः
स्यात्" इत्युक्त्वा चित्रग्रीवोपाख्यानं वर्णितवान् ।
मन्थरः सादरं हिरण्यकं संपूज्याह—'भद्र आत्मनो निर्जनवना-
गमनकारणमाख्यातुमर्हसि ।'
हिरण्यकोऽवदत्—'कथयामि । श्रूयताम्—

[टीका पु० पृ० ५८।३—५६।३]

दारिद्र्याद्ध्रियमेति ह्रीपरिगतः सत्त्वात्परिभ्रश्यते
निःसत्त्वः परिभूयते परिभवान्निर्वेदमापद्यते ।
निर्विण्णः शुचमेति शोकनिहतो बुद्ध्या परित्यज्यते
निर्बुद्धिः क्षयमेत्यहो निधनता सर्वापदामास्पदम् ॥१६

वरं मौनं कार्यं न च वचनमुक्तं यदनृतं
वरं प्राणत्यागो, न च पिशुनवाक्येष्वभिरुचिः ।
वरं भिक्षाशित्वं, न च परधनास्वादनसुखं
वरं वासोऽरण्ये, न पुनरविवेकाधिपपुरे ॥ १६८॥

सेवेव मानमखिलं, ज्योत्स्नेव तमो, जरेव लावण्यम् ।
हरिहरकथेव दुरितं, गुणशतमप्यर्थिता हरति ॥ १६६ ॥"

इति विमृश्य 'तत्किमहं परपिण्डेनात्मानं पोषयामि । कष्टं भोः ? त
द्वितीयं मृत्युद्वारम् ।

रोगी चिरप्रवासी परान्नभोजी परावसथशायी ।
यज्जीवति तन्मरणं यन्मरणं सोऽस्य विश्रामः ॥ १७० ॥"

इत्यालोच्यापि लोभात्पुनरण्यर्थं ग्रहीतुं ग्रहमकरवम् । तथा चोक्तम्—

लोभेन बुद्धिश्चलति लोभो जनयते तृषाम् ।
तृषार्तो दुःखमाप्नोति परत्रेह च मानवः ॥ १७१ ॥

ततोऽहं मन्दं मन्दमुपसर्पंस्तेन वीणाकर्णेन जर्जरवंशखण्डेन ताडितः ।
तदाऽहमचिन्तयम्—

'धनलुब्धो ह्यसन्तुष्टोऽनियतात्माऽजितेन्द्रियः ।
सर्वा एवापदस्तस्य यस्य तुष्टं न मानसम् ॥ १७२ ॥
सर्वाः संपत्तयस्तस्य संतुष्टं यस्य मानसम् ।
उपानद्गूढपादस्य ननु चर्मावृतेव भूः ॥ १७३ ॥

[टीका पु० पृ० ५६।३—५८।३]

सन्तोषामृततृप्तानां यत्सुखं शान्तचेतसाम् ।
कुतस्तद्धनलुब्धानामितश्चेतश्च धावताम् ॥ १७४ ॥
तेनाधीतं श्रुतं तेन तेन सर्वमनुष्ठितम् ।
येनाशाः पृष्ठतः कृत्वा नैराश्यमवलम्बितम् ॥ १७५ ॥
असेवितेश्वरद्वारमदृष्टविरहव्यथम् ।
अनुक्तक्लीबवचनं धन्यं कस्यापि जीवनम् ॥ १७६ ॥
न योजनशतं दूरं बाध्यमानस्य तृष्णया ।
सन्तुष्टस्य करप्राप्तेऽप्यर्थे भवति नादरः ॥ १७७ ॥

तदत्रावस्थोचितकार्यपरिच्छेदः श्रेयान् ।

को धर्मो भूतदया, किं सौख्यमरोगिता जगति जन्तोः ।
कः स्नेहः सद्भावः, किं पाण्डित्यं परिच्छेदः ॥ १७८ ॥
परिच्छेदो हि पाण्डित्यं यदापन्ना विपत्तयः ।
अपरिच्छेदकर्तॄणां विपदः स्युः पदे पदे ॥ १७९ ॥
त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् ।
ग्रामं जनपदस्यार्थे स्वात्मार्थे पृथिवीं त्यजेत् ॥ १८० ॥
पानीयं वा निरायासं स्वाद्वन्नं वा भयोत्तरम् ।
विचार्य खलु पश्यामि तत्सुखं यत्र निर्वृतिः ॥ १८१ ॥"

इत्यालोच्याहं निर्जनवनमागतः । यतः—

वरं वनं व्याघ्रगजेन्द्रसेवितं
द्रुमालयं पक्वफलाम्बुभोजनम् ।

[टीका पु० पृ० ५८।३—६०।२]

तृणानि शय्या परिधानवल्कलं
न बन्धुमध्ये धनहीनजीवनम् ॥ १८२ ॥

ततोऽस्मत्पुण्योदयादनेन मित्रेणाहं स्नेहानुवृत्त्यानुगृहीतः। अधुना च पुण्यपरम्परया भवदाश्रयः स्वर्ग एव मया प्राप्तः। यतः—

संसारविषवृक्षस्य द्वे एव रसवत्फले।
काव्यामृतरसास्वादः संगमः सुजनैः सह ॥ १८३ ॥'

मन्थर उवाच—

'अर्थाः पादरजोपमा गिरिनदीवेगोपमं यौवनम्
आयुष्यं जललोलबिन्दुचपलं वेगोपमं जीवितम्।
धर्मं यो न करोति निन्दितमतिः स्वर्गार्गलोद्घाटनं
पश्चात्तापयुतो जरापरिगतः शोकाग्निना दह्यते ॥ १

युष्माभिरतिसंचयः कृतः। तस्यायं दोषः। शृणु—

उपार्जितानां वित्तानां त्याग एव हि रक्षणम्।
तडागोदरसंस्थानां परीवाह इवाम्भसाम् ॥ १८५ ॥
यदधोऽधः क्षितौ वित्तं निचखान मितंपचः।
तदधोनिलयं गन्तुं चक्रे पन्थानमग्रतः ॥ १८६ ॥
निजसौख्यं निरुन्धानो यो धनार्जनमिच्छति।
परार्थं भारवाहीव क्लेशस्यैव हि भाजनम् ॥ १८७ ॥
दानोपभोगहीनेन धनेन धनिनो यदि।
भवामः किं न तेनैव धनेन धनिनो वयम् ॥ १८८ ॥
असंभोगेन सामान्यं कृपणस्य धनं परैः।
अस्येदमिति सम्बन्धो हानौ दुःखेन गम्यते ॥ १८९ ॥

[टीका पु० पृ० ६०३—६३।२]

धनं वा पुरुषो ब्रह्मन् पुरुषं धनमेव वा।
अवश्यमेकं त्यजति तस्मात् किं धनतृष्णया ॥ १६० ॥
दानं प्रियवाक्सहितं ज्ञानमगर्वं क्षमान्वितं शौर्यम्।
वित्तं त्यागनियुक्तं दुर्लभमेतच्चतुष्टयं लोके ॥ १६१ ॥
कर्तव्यः सञ्चयो नित्यं कर्तव्यो नातिसंचयः।
पश्य संचयशीलोऽसौ धनुषा जम्बुको हतः ॥ १६२ ॥"

तावाहतुः – 'कथमेतत्।'

मन्थरः कथयति—

[६ संचयशील शृगालमरण कथा—]

अस्ति कल्याणकटकवास्तव्यो भैरवो नाम व्याधः। स चैकदा मृगमन्विष्यन्विन्ध्याटवीं गतः। तेन तत्र व्यापदितं मृगमादाय गच्छता घोराकृतिः शूकरो दृष्टः। ततस्तेन व्याधेन मृगं भूमौ निधाय शूकरः शरेण हतः शूकरेणापि घनघोरगर्जनं कृत्वा ऽऽगत्य स व्याधो कटिदेशे प्रहृतः संछिन्नद्रुम इव भूमौ निपपात। यतः—

जलमग्निर्विषं शस्त्रं क्षुद् व्याधिः पतनं गिरेः।
निमित्तं किञ्चिदासाद्य देही प्राणैर्विमुच्यते ॥ १६३ ॥

अथ तयोः पादास्फालनेन सर्पोऽपि मृतः। अथानन्तरं दीर्घरावो नाम जम्बुकः परिभ्रमन्नेकत्रैव दैववशादाहारार्थी तान्मृतान्मृगव्याधसर्पशूकरानपश्यत्। अचिन्तयच्च—'अहो, अद्य महद्भोज्यं मे समुपस्थितम्। अथवा-

अचिन्तितानि दुःखानि यथैवायान्ति देहिनाम्।
सुखान्यपि तथा मन्ये दैवमत्रातिरिच्यते ॥ १६४ ॥

तद्भवतु। एषां मांसैर्मासत्रयं मे सुखेन गमिष्यति।

[टीका पु० पृ० ६३।२—६४।१]

मासमेकं नरो याति द्वौ मासौ मृगशूकरौ ।
अहिरेकं दिनं याति अद्य भक्ष्यो धनुर्गुणः ॥ १९५ ॥

ततः प्रथमबुभुक्षायामिदं निःस्वादु कोदण्डलग्नं स्नायुबन्धनं खादामि' इत्युक्त्वा तथाकृते सति छिन्ने स्नायुबन्धन उत्पतितेन धनुषा हृदि निर्भिन्नः स दीर्घरावः पञ्चत्वं गतः ॥

अतोऽहं ब्रवीमि—'कर्तव्यः सञ्चयो नित्यम्' (१९२) इत्यादि ॥
तथा च—

यद्ददासि विशिष्टेभ्यो यच्चाश्नासि दिने दिने ।
तत्ते वित्तमहं मन्ये शेषं कस्यापि रक्षसि ॥ १९६ ॥

तदिदानीं यातु । किमतिक्रान्तोपवर्णनेन । यतः—

नाप्राप्यमभिवाञ्छन्ति नष्टं नेच्छन्ति शोचितुम् ।
आपत्स्वपि न मुह्यन्ति नराः पण्डितबुद्धयः ॥ १९७ ॥

तत्सखे, सर्वदा त्वया सोत्साहेन भवितव्यम् । यतः—

शास्त्राण्यधीत्यापि भवन्ति मूर्खा
यस्तु क्रियावान्पुरुषः स विद्वान् ।
सुचिन्तितं चौषधमातुराणां
न नाममात्रेण करोत्यरोगम् ॥ १९८ ॥

न स्वल्पमप्यध्यवसायभीरोः करोति विज्ञानविधिर्गुणं हि ।
अन्धस्य किं हस्ततलस्थितोऽपि प्रकाशयत्यर्थमिह प्रदीपः ॥ १९९ ॥

तदत्र सखे, दशाविशेषे शान्तिः करणीया । एतदप्यतिकष्टं त्वया न मन्तव्यम् । यतः—

निपानमिव मण्डूकाः सरः पूर्णमिवाण्डजाः ।
सोद्योगं नरमायान्ति विवशाः सर्वसंपदः ॥ २०० ॥
सुखमापतितं सेव्यं दुःखमापतितं तथा ।
चक्रवत्परिवर्तन्ते दुःखानि च सुखानि च ॥ २०१ ॥

[टीका पु० पृ० ६४।१—६६।१]

उत्साहसंपन्नमदीर्घसूत्रं क्रियाविधिज्ञं व्यसनेष्वसक्तम्।
शूरं कृतज्ञं दृढसौहृदं च लक्ष्मीः स्वयं याति निवासहेतोः ॥ २०२ ॥

विनाप्यर्थैर्वीरः स्पृशति बहुमानोन्नतिपदं
समायुक्तोऽप्यर्थैः परिभवपदं याति कृपणः।
स्वभावादुद्भूतां गुणसमुदयावाप्तिविषयां
द्युतिं सैंहीं किं श्वा धृतकनकमालोऽपि लभते ॥ २०३ ॥

धनवानिति हि मदो मे किं गतविभवो विषादमुपयासि।
करनिहितकन्दुकसमाः पातोत्पाता मनुष्याणाम् ॥ २०४ ॥

वृत्त्यर्थं नातिचेष्टेत सा हि धात्रैव निर्मिता।
गर्भादुत्पतिते जन्तौ मातुः प्रस्नवतः स्तनौ ॥ २०५ ॥

अपि च सखे—

येन शुक्लीकृता हंसाः शुकाश्च हरितीकृताः।
मयूराश्चित्रिता येन स ते वृत्तिं विधास्यति ॥ २०६ ॥

अपरं च सतां रहस्यं शृणु मित्र—

जनयन्त्यर्जने दुःखं तापयन्ति विपत्तिषु।
मोहयन्ति च संपत्तौ कथमर्थाः सुखावहाः ॥ २०७ ॥

धर्मार्थं यस्य वित्तेहा वरं तस्य निरीहता।
प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरम् ॥ २०८ ॥

यथा ह्यामिषमाकाशे पक्षिभिः श्वापदैर्भुवि।
भक्ष्यते सलिले नक्रैस्तथा सर्वत्र वित्तवान् ॥ २०९ ॥

राजतः सलिलादग्नेश्चोरतः स्वजनादपि।
भयमर्थवतां नित्यं मृत्योः प्राणभृतामिव ॥ २१० ॥

[टीका पु० पृ० ६६।१—६८।१]

तथा हि—

जन्मनि क्लेशबहुले किं नु दुःखमतः परम्।
इच्छासंपद्यतो नास्ति यच्चेच्छा न निवर्तते ॥ २११ ॥

अन्यच्च भ्रातः शृणु—

धनं तावदसुलभं लब्धं कृच्छ्रेण रक्ष्यते।
लब्धनाशो यथा मृत्युस्तस्मादेतन्न चिन्तयेत् ॥ २१२ ॥
तृष्णां चेह परित्यज्य को दरिद्रः क ईश्वरः।
तस्याश्चेत्प्रसरो दत्तो दास्यं च शिरसि स्थितम् ॥ २१३ ॥
यद्यदेव हि वाञ्छेत ततो वाञ्छाऽनुवर्तते।
प्राप्त एवार्थतः सोऽर्थो यतो वाञ्छा निवर्तते ॥ २१४ ॥

किं बहुना मम पक्षपातेन। मयैव सहात्र महान् कालो नीयताम्। यतः—

आमरणान्ताः प्रणयाः कोपास्तत्क्षणभङ्गुराः।
परित्यागाश्च निःसङ्गा भवन्ति हि महात्मनाम् ॥ २१५ ॥

इति श्रुत्वा लघुपतनको ब्रूते—'धन्योऽसि मन्थर, सर्वथा श्लाघ्यगुणोऽसि। यतः—

सन्त एव सतां नित्यमापदुद्धरणक्षमाः।
गजानां पङ्कमग्नानां गजा एव धुरंधराः ॥ २१६ ॥
श्लाघ्यः स एको भुवि मानवानां
स उत्तमः सत्पुरुषः स धन्यः।
यस्यार्थिनो वा शरणागता वा
नाशाभिभङ्गाद्विमुखाः प्रयान्ति ॥ २१७ ॥'

तदेवं ते स्वेच्छाहारविहारं कुर्वाणाः संतुष्टाः सुखं निवसन्ति ॥

अथ कदाचिच्चित्राङ्गनामा मृगः केनापि त्रासितस्तत्रागत्य मिलितः। ततस्तत्पश्चादायान्तं भयहेतुमालोक्य मन्थरो जलं प्रविष्टः। मूषिकश्च विवरं गतः। काकोऽप्युड्डीय वृक्षाग्रमारूढः।

[टीका पु० पृ० ६८।१—७०।२]

ततो लघुपतनकेन सुदूरं निरूप्य 'भयहेतुर्न कोऽप्यायाति' इत्यालोचितम्।

पश्चात्तद्वचनादागत्य पुनः सर्वे मिलित्वा तत्रैवोपविष्टाः।

मन्थरेणोक्तम्—'भद्रं मृग, स्वागतं ते। स्वेच्छयोदकाद्याहारोऽनुभूयताम्। अत्रावस्थानेन वनमिदं सनाथीक्रियताम्।'

चित्राङ्गो ब्रूते—'लुब्धकत्रासितोऽहं भवतां शरणमागतो भवद्भिः सह सख्यमिच्छामि।'

हिरण्यकोऽवदत्—'मित्रत्वं तावदस्माभिः सहायत्नेन निष्पन्नमेव भवतः। यतः—

औरसं कृतसंबन्धं तथा वंशक्रमागतम्।
रक्षितं व्यसनेभ्यश्च मित्रं ज्ञेयं चतुर्विधम्॥ २१८॥

तद् भवता स्वगृहनिर्विशेषं स्थीयताम्।'

तच्छ्रुत्वा **मृगः** सानन्दो भूत्वा स्वेच्छाहारं कृत्वा पानीयं पीत्वा जलासन्नतरुच्छायायामुपविष्टः।

अथ **मन्थरेणोक्तम्**—'सखे मृग, एतस्मिन्निर्जने वने केन त्रासितोऽसि। कदाचित्किं व्याधाः संचरन्ति।'

मृगेणोक्तम्—'अस्ति कलिङ्गविषये रुक्माङ्गदो नाम नरपतिः। स च दिग्विजयव्यापारक्रमेणागत्य चन्द्रभागानदीतीरे समावासितकटको वर्तते। प्रातश्च तेनात्रागत्य कर्पूरसरःसमीपे भवितव्यम्' इति व्याधानां मुखात्किंवदन्ती श्रूयते। तदत्रापि प्रातरवस्थानं भयहेतुकमित्यालोच्य यथावसरं कार्यमारभ्यताम्।'

तच्छ्रुत्वा **कूर्मः** सभयमाह—'जलाशयान्तरं गच्छाम।'

काकमृगावप्युक्तवन्तौ—'एवमस्तु।'

ततो **हिरण्यको** विमृश्याह—'जलाशयान्तरे प्राप्ते मन्थरस्य कुशलम्, स्थले गच्छतः कः प्रतीकारः। यतः—

अम्भांसि जलजन्तूनां दुर्गं दुर्गनिवासिनाम्।
स्वभूमिः श्वापदादीनां राज्ञां मन्त्री परं बलम्॥ २१९॥

[टीका पु० पृ० ७०।२—७२।३]

तद्धितवचनमवधार्य महता भयेन विमुग्ध इव तं जलाशयमुत्सृज्य मन्थरश्चलितः।

तेऽपि हिरण्यकादयः स्नेहादनिष्टं शङ्कमाना मन्थरमनुगच्छन्ति। ततः स्थले गच्छन् केनापि व्याधेन काननं पर्यटता मन्थरः प्राप्तः। प्राप्य च तं गृहीत्वोत्थाप्य धनुषि बद्ध्वा (व्याधो) भ्रमक्लेशात्क्षुत्पिपासाकुलः स्वगृहाभिमुखश्चलितः।

अथ मृगवायसमूषिकाः परं विषादं गच्छन्तस्तमनुजग्मुः।

ततो हिरण्यको विलपति—

'एकस्य दुःखस्य न यावदन्तं गच्छाम्यहं पारमिवार्णवस्य।
तावद्द्वितीयं समुपस्थितं मे छिद्रेष्वनर्था बहुलीभवन्ति ॥ २२० ॥

स्वाभाविकं तु यन्मित्रं भाग्येनैवाभिजायते।
तदकृत्रिमसौहार्दमापत्स्वपि न मुञ्चति ॥ २२१ ॥

न मातरि, न दारेषु, न सोदर्ये न चात्मजे।
विश्वासस्तादृशः पुंसां यादृङ् मित्रे स्वभावजे ॥ २२२ ॥'

इति मुहुर्विचिन्त्य 'अहो दुर्दैवम्। यतः—

स्वकर्मसंतानविचेष्टितानि कालान्तरावर्तिशुभाशुभानि।
इहैव दृष्टानि मयैव तानि जन्मान्तराणीव दशान्तराणि ॥२२३॥

अथवेत्थमेवैतत्—

कायः संनिहितापायः संपदः पदमापदाम्।
समागमाः सापगमाः सर्वमुत्पादि भङ्गुरम् ॥ २२४ ॥

पुनर्विमृश्याह—

'शोकारातिभयत्राणं प्रीतिविश्रम्भभाजनम्।
केन रत्नमिदं सृष्टं मित्रमित्यक्षरद्वयम् ॥ २२५ ॥

मित्रं प्रीतिरसायनं नयनयोरानन्दनं चेतसः
पात्रं यत्सुखदुःखयोः सह भवेन्मित्रेण तद्दुर्लभम्।
ये चान्ये सुहृदः समृद्धिसमये द्रव्याभिलाषाकुला-
स्ते सर्वत्र मिलन्ति तत्त्वनिकषग्रावा तु तेषां विपत् ॥ २२६ ॥

[टीका पु० पृ० ७२।३—७४।२]

इति बहु विलप्य हिरण्यकश्चित्राङ्गलघुपतनकावाह—'यावदयं व्याधो वनान्न निःसरति तावन्मन्थरं मोचयितुं यत्नः क्रियताम्'

तावूचतुः—'सत्वरं कार्यमुच्यताम् ।'

हिरण्यको ब्रूते—'चित्राङ्गो जलसमीपं गत्वा मृतमिवात्मानं दर्शयतु । काकश्च तस्योपरि स्थित्वा चञ्च्वा किमपि विलिखतु । नूनमनेन लुब्धकेन तत्र कच्छपं परित्यज्य मृगमांसार्थिना सत्वरं गन्तव्यम् । ततोऽहं मन्थरस्य बन्धनं छेत्स्यामि । संनिहिते लुब्धके भवद्भ्यां पलायितव्यम् ।''

चित्राङ्गलघुपतनकाभ्यां शीघ्रं गत्वा तथानुष्ठिते सति स व्याधः श्रान्तः पानीयं पीत्वा तरोरधस्तादुपविष्टस्तथाविधं मृगमपश्यत् । ततस्तत्र कच्छपं निधाय कर्तरिकामादाय प्रहृष्टमना मृगयुर्मृगान्तिकं चलितः ।

तत्रान्तरे हिरण्यकेनागत्य मन्थरस्य बन्धनं छिन्नम् ।

स कूर्मः सत्वरं जलाशयं प्रविवेश ।

स मृग आसन्नं तं व्याधं विलोक्योत्थाय पलायितः ।

प्रत्यावृत्य लुब्धको यावत्तरुतलमायाति तावत्कूर्ममपश्यन्नचिन्तयत्—'उचितमेवैतन्ममासमीक्ष्यकारिणः । यतः—

यो ध्रुवाणि परित्यज्य अध्रुवाणि निषेवते ।
ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव हि ॥ २२७ ॥'

ततोऽसौ स्वकर्मवशान्निराशः कटकं प्रविष्टः ।

मन्थरादयश्च सर्वे विमुक्तापदः स्वस्वस्थानं गत्वा यथासुखमास्थिताः ।

एवं श्रुत्वा राजपुत्रैः सानन्दमुक्तम्—'चेत्सर्वे ते सुखसंपन्नाः स्थिताः । सिद्धं नः समीहितम् ।''

विष्णुशर्मोवाच--'एतत्तावद्भवतामभिलषितं संपन्नम् ॥'

इति हितोपदेशे मित्रलाभो नाम प्रथमः कथासंग्रहः समाप्तः ॥

———

[टीका पु० पृ० ७४।३—७६।१]

सुहृद्भेदः ।

अथ राजपुत्रा ऊचुः—'आर्य' मित्रलाभः श्रुतस्तावदस्माभिः । इदानीं सुहृद्भेदं श्रोतुमिच्छामः ।''

विष्णुशर्मोवाच—'सुहृद्भेदं तावच्छृणुत । यस्यायमाद्यः श्लोकः—

वर्धमानो महान् स्नेहो मृगेन्द्रवृषयोर्वने ।
पिशुनेनातिलुब्धेन जम्बुकेन विनाशितः ॥ २२८ ॥'

राजपुत्रैरुक्तम्—'कथमेतत् ।'

विष्णुशर्मा कथयति—

[१ म संजीवक पिङ्गलक कथा--]

अस्ति दक्षिणापथे सुवर्णवती नाम नगरी । तत्र वर्धमानो नाम वणिग् निवसति । तस्य प्रचुरेऽपि वित्तेऽपरान्बन्धूनतिसमृद्धानवलोक्य पुनरर्थवृद्धिः करणीयेति मतिर्बभूव । यतः—

अधोऽधः पश्यतः कस्य महिमा नोपचीयते ।
उपर्युपरि पश्यन्तः सर्व एव दरिद्रति ॥ २२९ ॥
ब्रह्महापि नरः पूज्यो यस्यास्ति विपुलं धनम् ।
शशिनस्तुल्यवंशोऽपि निर्धनः परिभूयते ॥ २३० ॥
संपदा सुस्थितंमन्यो भवति स्वल्पयापि यः ।
कृतकृत्यो विधिर्मन्ये न वर्धयति तस्य ताम् ॥ २३१ ॥
निरुत्साहं निरानन्दं निर्वीर्यमरिनन्दनम् ।
मा स्म सीमन्तिनी काचिज्जनयत्पुत्रमीदृशम् ॥ २३२ ॥
अलब्धं चैव लिप्सेत लब्धं रक्षेदवेक्षया ।
रक्षितं वर्धयेत्सम्यग्वृद्धं तीर्थेषु निक्षिपेत् ॥ २३३ ॥

[टीका पु० पृ० ७८।१—७८।३]
यतो लब्धुमनिच्छतोऽनुद्योगादर्थस्य प्राप्तिरेव न। लब्धस्याप्यरक्षितस्य निधेरपि स्वयं विनाशः। अवर्धमानश्चार्थः काले स्वल्पव्ययोऽप्यञ्जनवत्क्षयमेति। अनुपभुज्यमानश्च निष्प्रयोजन एव सः। तथा चोक्तम्—

धनेन किं यो न ददाति नाश्नुते
बलेन किं यश्च रिपून्न बाधते।
श्रुतेन किं यो न च धर्ममाचरे-
त्किमात्मना यो न जितेन्द्रियो भवेत्॥ २३४॥
अञ्जनस्य क्षयं दृष्ट्वा वल्मीकस्य च संचयम्।
अवन्ध्यं दिवसं कुर्याद्दानाध्ययनकर्मसु॥ २३५॥
जलबिन्दुनिपातेन क्रमशः पूर्यते घटः।
स हेतुः सर्वविद्यानां धर्मस्य च धनस्य च॥ २३६॥
दानोपभोगरहिता दिवसा यस्य यान्ति वै।
स कर्मकारभस्त्रेव श्वसन्नपि न जीवति॥ २३७॥'

इति संचिन्त्य नन्दकसंजीवकनामानौ वृषभौ धुरि नियोज्य शकटं नानाविधद्रव्यपूर्णं कृत्वा वाणिज्येन गतः काश्मीरं प्रति। यतः—

कोऽतिभारः समर्थानां किं दूरं व्यवसायिनाम्।
को विदेशः सविद्यानां कः परः प्रियवादिनाम्॥ २३८॥

अथ गच्छतस्तस्य सुदुर्गनाम्नि महारण्ये संजीवको भग्नजानुर्निपतितः। तमालोक्य वर्धमानोऽचिन्तयत्—

'करोतु नाम नीतिज्ञो व्यवसायमितस्ततः।
फलं पुनस्तदेवास्य यद्विधेर्मनसि स्थितम्॥ २३९॥
विस्मयः सर्वथा हेयः प्रत्यूहः सर्वकर्मणाम्।
तस्माद्विस्मयमुत्सृज्य साध्ये सिद्धिर्विधीयताम्॥ २४०॥"

इति संचिन्त्य संजीवकं तत्र परित्यज्य वर्धमानः पुनः स्वयं धर्मपुरं नाम नगरं गत्वा महाकायमन्यं वृषभमेकं समानीय धुरि नियोज्य चलितः।

[टीका पृ० पृ० ७८।३—८०।४]

ततः संजीवकोऽपि कथं कथमपि खुरत्रये भारं कुर्वंस्तत्र वने स्थि
यतः—

निमग्नस्य पयोराशौ पर्वतात्पतितस्य च ।
तक्षकेणापि दष्टस्य आयुर्मर्माणि रक्षति ॥ २४१ ॥
नाकाले म्रियते जन्तुर्विद्धः शरशतैरपि ।
कुशाग्रेणापि संस्पृष्टः प्राप्तकालो न जीवति ॥ २४२ ॥
अरक्षितं तिष्ठति दैवरक्षितं
सुरक्षितं दैवहतं विनश्यति ।
जीवत्यनाथोऽपि वने विसर्जितः
कृतप्रयत्नोऽपि गृहे न जीवति ॥ २४३ ॥

ततो दिनेषु गच्छत्सु संजीवकः स्वेच्छाहारविहारं कृत्वाऽरण्ये भ्राम्यन् हृष्टपुष्टाङ्गो बलवान्ननाद ।

तस्मिन्वने पिङ्गलकनामा सिंहः स्वभुजोपार्जितराज्यसुखमनुभवन्नि- वसति । तथा चोक्तम्—

नाभिषेको न संस्कारः सिंहस्य क्रियते मृगैः ।
विक्रमार्जितराज्यस्य स्वयमेव मृगेन्द्रता ॥ २४४ ॥

स चैकदा पिपासाकुलितः पानीयं पातुं यमुनाकच्छमगच्छत् ।

तेन च तत्र सिंहेनाननुभूतपूर्वमकालघनगर्जितमिव संजीवकनर्दितम- श्रावि ।

तच्छ्रुत्वा पानीयमपीत्वा सचकितः परिवृत्य स्वस्थानमागत्य किमिद- मित्यालोचयन्नेवायं तूष्णीं स्थितः ।

स च तथाविधः करटकदमनकाभ्यामस्य मन्त्रिपुत्राभ्यां शृगालाभ्यां दृष्टः ।

तं तथाविधं दृष्ट्वा दमनकः करटकमाह—'सखे करटक, किमित्यय- मुदकार्थी स्वामी पानीयमपीत्वा सचकितो मन्दं मन्दमवतिष्ठते ।'

करटको ब्रूते—'मित्र दमनक, अस्मन्मतेनास्य सेवैव न क्रियते ।

[टीका पु० पृ० ८०।४—८२।३]

यदि तथा भवति तर्हि किमनेन स्वामिचेष्टानिरूपणेनास्माकम् । यतोऽनेन राज्ञा विनापराधेन चिरमवधीरिताभ्यामावाभ्यां महद्दुःखमनुभूतम् ।

सेवया धनमिच्छद्भिः सेवकैः पश्य यत्कृतम् ।
स्वातन्त्र्यं यच्छरीरस्य मूढैस्तदपि हारितम् ॥ २४५ ॥

शीतवातातपक्लेशान् सहन्ते यान्पराश्रिताः ।
तदंशेनापि मेधावी तपस्तप्त्वा सुखी भवेत् ॥ २४६ ॥

एतावज्जन्मसाफल्यं यदनायत्तवृत्तिता ।
ये पराधीनतां यातास्ते वै जीवन्ति के मृताः ॥ २४७ ॥

एहि गच्छ पतोत्तिष्ठ वद मौनं समाचर ।
एवमाशाग्रहग्रस्तैः क्रीडन्ति धनिनोऽर्थिभिः ॥ २४८ ॥

या प्रकृत्यैव चपला निपतत्यशुचावपि ।
स्वामिनो बहु मन्यन्ते दृष्टिं तामपि सेवकाः ॥ २४९ ॥

मौनान्मूर्खः प्रवचनपटुर्वातुलो जल्पको वा
क्षान्त्या भीरुर्यदि न सहते प्रायशो नाभिजातः ।
धृष्टः पार्श्वे वसति नियतं दूरतश्चाप्रगल्भः
सेवाधर्मः परमगहनो योगिनामप्यगम्यः ॥ २५० ॥

प्रणमत्युन्नतिहेतोर्जीवितहेतोर्विमुञ्चति प्राणान् ।
दुःखीयति सुखहेतोः को मूढः सेवकादन्यः ॥ २५१ ॥

दमनको ब्रूते—'मित्र, सर्वथा मनसापि नैतत्कर्तव्यम् । यतः—

कथं नाम न सेव्यन्ते यत्नतः परमेश्वराः ।
अचिरेणैव ये तुष्टाः पूरयन्ति मनोरथान् ॥ २५२ ॥

[टीका पु० पृ० ८३।३—८४।४]

अन्यच्च पश्य—

कुतः सेवाविहीनानां चामरोद्धूतसंपदः ।
उद्दण्डधवलच्छत्रं वाजिवारणवाहिनी ॥ २५३ ॥"

करटको ब्रूते—'तथापि किमनेनास्माकमव्यापारेण । यतोऽव्यापारेषु व्यापारः सर्वथा परिहरणीयः ।"

दमनको ब्रूते—'तथापि स्वामिचेष्टानिरूपणं सेवकेनावश्यं करणीयम् ।'

करटको ब्रूते—'सर्वस्मिन्नधिकारे य एव नियुक्तः प्रधानमन्त्री स करोतु । यतोऽनुजीविना पराधिकारचर्चा सर्वथा न कर्तव्या । पश्य—

पराधिकारचर्चां यः कुर्यात्स्वामिहितेच्छया ।
स विषीदति चीत्काराद् गर्दभस्ताडितो यथा ॥ २५४ ॥"

दमनकः पृच्छति—'कथमेतत् ।"

करटको ब्रूते—

[८ म रजक-गर्दभ कुक्कुर कथा प्रारम्भः]

अस्ति वाराणस्यां कर्पूरपटको नाम रजकः । स चैकदा प्रसुप्तः । तदनन्तरं तद्गृहद्रव्याणि हर्तुं चौरः प्रविष्टः ।

तस्य प्राङ्गणे गर्दभो बद्धस्तिष्ठति कुक्कुरश्चोपविष्टोऽस्ति ।

अथ गर्दभः श्वानमाह—'सखे, भवतस्तावदयं व्यापारः । तत्किमिति त्वमुच्चैः शब्दं कृत्वा स्वामिनं न जागरयसि ।"

कुक्कुरो ब्रूते—'भद्र, मम नियोगस्य चर्चा त्वया न कर्तव्या । किं न जानासि, यथाहमस्याहर्निशं गृहरक्षां करोमि । यतोऽयं चिरान्निर्वृतो ममोपयोगं न जानाति । तेनाधुनापि ममाहारदाने मन्दादरः । यतो विना विधुरदर्शनं स्वामिन उपजीविषु मन्दादरा भवन्ति ।"

गर्दभो ब्रूते—'शृणु रे बर्बर—

याचते कार्यकाले यः स किंभृत्यः स 'किंसुहृत्' ।

कुक्कुरो ब्रूते—शृणु तावत्—

भृत्यान्संभाषयेद्यस्तु कार्यकाले स 'किंप्रभुः' ॥ २५५ ॥

[टीका पु० पृ० ८४।४—८६।३]

ततो गर्दभः सकोपमाह—'अरे दुष्टमते, पापीयांस्त्वं यद्विपत्तौ स्वामिकार्योपेक्षां करोषि । भवतु तावत् । यथा स्वामी जागरिष्यति तन्मया कर्तव्यम् । यतः—

पृष्ठतः सेवयेदर्कं जठरेण हुताशनम् ।
स्वामिनं सर्वभावेन परलोकममायया ॥ २५६ ॥"

इत्युक्त्वोच्चैश्चीत्कारशब्दं कृतवान् ।

ततो रजकस्तेन चीत्कारेण प्रबुद्धो निद्राभङ्गकोपादुत्थाय गर्दभं लगुडेन ताडयामास ।

अतोऽहं ब्रवीमि—'पराधिकारचर्चाम्' २५४ इत्यादि ॥

पशूनामन्वेषण एवास्मन्नियोगः । स स्वनियोगचर्चा क्रियताम् । (विमृश्य) किं त्वद्य तया चर्चयाऽपि न प्रयोजनम् । यत आवयोर्भक्षितशेषाहारः प्रचुरोऽस्ति ।"

दमनकः सरोषमाह—'कथमाहारार्थी भवान्केवलं राजानं सेवते । एतदयुक्तं तव । यतः—

सुहृदामुपकारकारणाद्द्विषतामप्यपकारकारणात् ।
नृपसंश्रय इष्यते बुधैर्जठरं को न बिभर्ति केवलम् ॥ २५७ ॥
जीविते यस्य जीवन्ति विप्रा मित्राणि बान्धवाः ।
सफलं जीवितं तस्य आत्मार्थे को न जीवति ॥ २५८ ॥
यस्मिञ्जीवति जीवन्ति बहवः स तु जीवति ।
काकोऽपि किं न कुरुते चञ्च्वा स्वोदरपूरणम् ॥ २५९ ॥
पञ्चभिर्याति दासत्वं पुराणैः कोऽपि मानवः ।
कोऽपि लक्षैः कृती कोऽपि लक्षैरपि न लभ्यते ॥ २६० ॥
मनुष्यजातौ तुल्यायां भृत्यत्वमतिगर्हितम् ।
प्रथमो यो न तत्रापि स किं जीवत्सु गण्यते ॥ २६१ ॥

[टीका पु० पृ० ८६।३—८८।२]

वाजिवारणलोहानां काष्ठपाषाणवाससाम् ।
नारीपुरुषतोयानामन्तरं महदन्तरम् ॥ २६२ ॥

स्वल्पस्नायुवसावशेषमलिनं निर्मांसमप्यस्थिकं
श्वा लब्ध्वा परितोषमेति न तु तत्तस्य क्षुधाशान्तये ।
सिंहो जम्बुकमङ्कमागतमपि त्यक्त्वा निहन्ति द्विपं
सर्वः कृच्छ्रगतोपि वाञ्छति जनः सत्त्वानुरूपं फलम् ॥२६३॥

अपरं च सेव्यसेवकयोरन्तरं पश्य—

लाङ्गूलचालनमधश्चरणावपातं
भूमौ निपत्य वदनोदरदर्शनं च ।
श्वा पिण्डदस्य कुरुते गजपुङ्गवस्तु
धीरं विलोकयति चाटुशतैश्च भुङ्क्ते ॥ २६४ ॥

यज्जीव्यते क्षणमपि प्रथितं मनुष्यै-
र्विज्ञानविक्रमयशोभिरभग्नमानम् ।
तन्नाम जीवितमिह प्रवदन्ति तज्ज्ञाः
काकोपि जीवति चिराय बलिं च भुङ्क्ते ॥ २६५ ॥

यो नात्मजे न च गुरौ न च भृत्यवर्गे
दीने दयां न कुरुते न च बन्धुवर्गे ।
किं तस्य जीवितफलेन मनुष्यलोके
काकोपि जीवति चिरं च बलिं च भुङ्क्ते ॥२६५॥

अहितहितविचारशून्यबुद्धेः
श्रुतिसमयैर्बहुभिस्तिरस्कृतस्य ।
उदरभरणमात्रकेवलेच्छोः
पुरुषपशोश्च पशोश्च को विशेषः ॥ २६७ ॥”

[टीका पु० पृ० ८८।२—९०।१]

करटको ब्रूते—'आवां तावदप्रधानौ। तदन्यावयोः किमनया विचारणया।"

दमनको ब्रूते—'कियता कालेनामात्याः प्रधानताममप्रधानतां वा लभन्ते। यतः—

न कस्यचित्कश्चिदिह स्वभावा-
द्भवत्युदारोऽभिमतः खलो वा।
लोके गुरुत्वं विपरीततां वा
स्वचेष्टितान्येव नरं नयन्ति॥ २६८॥

आरोप्यते शिला शैले यत्नेन महता यथा।
निपात्यते क्षणेनाधस्तथात्मा गुणदोषयोः॥ २६९॥

यात्यधोऽधो व्रजत्युच्चैर्नरः स्वैरेव कर्मभिः।
कूपस्य खनिता यद्वत्प्राकारस्येव कारकः॥ २७०॥

तद्भद्रम्। स्वयत्नायत्तो ह्यात्मा सर्वस्य।"

करटको ब्रूते—'अथ भवान् किं ब्रवीति।"

स आह—'अयं तावत्स्वामी पिङ्गलकः कुतोऽपि कारणात्सचकितः परिवृत्योपविष्टः।"

करटको ब्रूते—'किं तत्त्वं जानासि।"

दमनको ब्रूते—'किमत्राविदितमस्ति। उक्तं च—

उदीरितोऽर्थः पशुनापि गृह्यते
हयाश्च नागाश्च वहन्ति देशिताः।
अनुक्तमप्यूहति पण्डितो जनः
परेङ्गितज्ञानफला हि बुद्धयः॥ २७१॥

आकारैरिङ्गितैर्गत्या चेष्टया भाषणेन च।
नेत्रवक्त्रविकारेण लक्ष्यतेऽन्तर्गतं मनः॥ २७२॥

तदत्र भयप्रस्तावे प्रज्ञाबलेनाहमेनं स्वामिनमात्मीयं करिष्यामि। यतः—

प्रस्तावसदृशं वाक्यं सद्भावसदृशं प्रियम्।
आत्मशक्तिसमं कोपं यो जानाति स पण्डितः॥ २७३॥

[टीका पु० पृ० ६०।१—६२।१]

करटको ब्रूते—'सखे, त्वं सेवानभिज्ञः। पश्य—

अनाहूतो विशेद्यस्तु अपृष्टो बहु भाषते।
आत्मानं मन्यते प्रीतं भूपालस्य स दुर्मतिः॥ २७४॥"

दमनको ब्रूते—'भद्र, कथमहं सेवानभिज्ञः। पश्य—

किमप्यस्ति स्वभावेन सुन्दरं वाप्यसुन्दरम्।
यदेव रोचते यस्मै भवेत्तत्तस्य सुन्दरम्॥ २७५॥
यस्य यस्य हि यो भावस्तेन तेन हि तं नरम्।
अनुप्रविश्य मेधावी क्षिप्रमात्मवशं नयेत्॥ २७६॥
कोऽत्रेत्यहमिति ब्रूयात्सम्यगादेशयेति च।
आज्ञामवितथां कुर्याद्यथाशक्ति महीपतेः॥ २७७॥
अल्पेच्छुर्धृतिमान्प्राज्ञश्छायेवानुगतः सदा।
आदिष्टो न विकल्पेत स राजवसतौ वसेत्॥ २७८॥"

करटको ब्रूते—'कदाचित्त्वामनवसरप्रवेशादवमन्यते स्वामी।"

सोऽब्रवीत्—'अस्त्वेवम्। तथाप्यनुजीविना स्वामिसांनिध्यमवश्यं करणीयम्। यतः—

दोषभीतेरनारम्भस्तत्कापुरुषलक्षणम्।
कैरजीर्णभयाद्भ्रातर्भोजनं परिहीयते॥ २७९॥
आसन्नमेव नृपतिर्भजते मनुष्यं
विद्याविहीनमकुलीनमसंगतं वा।
प्रायेण भूमिपतयः प्रमदा[१] लताश्च
यः पार्श्वतो वसति तं परिवेष्टयन्ति॥ २८०॥"

करटको ब्रूते—'अथ तत्र गत्वा किं वक्ष्यति भवान्।"

---

१ प्रकृष्टो मदो येषां ते प्रमदा मदोन्मत्ताः। 'प्रमदः संमदे मत्ते' इति मेदिनी।

[टीकापु० पृ० ६२।१—६३।४]

स आह—'शृणु। किमनुरक्तो विरक्तो वा मयि स्वामीति ज्ञास्यामि तावत्।"

करटको ब्रूते—'किं तज्ज्ञानलक्षणम्।"

दमनको ब्रूते—'शृणु—

दूरादवेक्षणं हासः संप्रश्नेष्वादरो भृशम्।
परोक्षेऽपि गुणश्लाघा स्मरणं प्रियवस्तुषु॥ २८१॥
तत्सेवके चानुरक्तिर्दानं सप्रियभाषणम्।
अनुरक्तेश्चिन्हानि दोषेऽपि गुणसंग्रहः॥ २८२॥
कालयापनमाशानां वर्धनं फलखण्डनम्।
विरक्तेश्वरचिह्नानि जानीयान्मतिमान्नरः॥ २८३॥"

एतज्ज्ञात्वा यथायं ममायत्तो भविष्यति तथा वक्ष्यामि। यतः—

अपायसंदर्शनजां विपत्तिमुपायसंदर्शनजां च सिद्धिम्।
मेधाविनो नीतिविधिप्रयुक्तां पुरः स्फुरन्तीमिव दर्शयन्ति॥२८४॥

करटको ब्रूते—'तथाप्यप्राप्ते प्रस्तावे न वक्तुमर्हसि। यतः—

अप्राप्तकालवचनं बृहस्पतिरपि ब्रुवन्।
प्राप्नुयाद्बुद्ध्यवज्ञानमपमानं च शाश्वतम्॥ २८५॥"

दमनको ब्रूते—'मित्र, मा भैषीः। नाहमप्राप्तावसरं वचनं वदिष्यामि। यतः—

आपद्युन्मार्गगमने कार्यकालात्ययेषु च।
अपृष्टेनापि वक्तव्यं भृत्येन हितमिच्छता॥ २८६॥

यदि च प्राप्तावसरोऽपि मन्त्रो मया न वक्तव्यस्तदा मन्त्रित्वमेव ममानुपपन्नम्। यतः—

कल्पयति येन वृत्तिं येन च लोके प्रशस्यते सद्भिः।
स गुणस्तेन च गुणिना रक्ष्यः संवर्धनीयश्च॥ २८७॥

तद्भद्र, अनुजानीहि माम्। गच्छामि।'

[टीका पु० पृ० ६३।४—६५।४]

करटको ब्रूते—'शुभमस्तु। शिवास्ते सन्तु पन्थानः। यथाभिलषित-मनुष्ठीयताम् ॥' इति।

ततो दमनको विस्मितइव पिङ्गलकसमीपं गतः।

अथ दूरादेव सादरं राज्ञा प्रवेशितः स साष्टाङ्गपातं प्रणिपत्योपविष्टः।

राजाह—'चिराद्दृष्टोऽसि।'

दमनको ब्रूते—'यद्यपि मया सेवकेन श्रीमद्देवपादानां न किञ्चित्प्रयोजनमस्ति तथापि प्राप्तकालमनुजीविना सांनिध्यमवश्यं कर्तव्यमित्यागतोऽस्मि।

दन्तस्य निर्घर्षणकेन राजन्कर्णस्य कण्डूयनकेन वापि।
तृणेन कार्यं भवतीश्वराणां किमङ्ग वाक्पाणिमता नरेण ॥ २८८ ॥

यद्यपि चिरेणावधीरितस्य देवपादैर्मे बुद्धिनाशः शङ्क्यते तदपि न शङ्कनीयम्। यतः—

मणिर्लुठति पादेषु काचः शिरसि धार्यते।
यथैवास्ते तथैवास्तां काचः काचो मणिर्मणिः ॥ २८९ ॥

कदर्थितस्यापि च धैर्यवृत्तेर्बुद्धेर्विनाशो न हि शङ्कनीयः।
अधः कृतस्यापि तनूनपातो नाधः शिखा याति कदाचिदेव ॥२९०॥

देव, तत्सर्वथा विशेषज्ञेन स्वामिना भवितव्यम्। यतः—

निर्विशेषो यदा राजा समं सर्वेषु वर्तते।
तदोद्यमसमर्थानामुत्साहः परिहीयते ॥ २९१ ॥

त्रिविधाः पुरुषा राजन्नुत्तमाधममध्यमाः।
नियोजयेत्तथैवैतांस्त्रिविधेष्वेव कर्मसु ॥ २९२ ॥

स्थान एव नियोज्यन्ते भृत्या आभरणानि च।
न हि चूडामणिः पादे नूपुरं मूर्ध्नि धार्यते ॥ २९३ ॥

[टीका पु० पृ० ६५।४—६७।३]

कनकभूषणसंग्रहणोचितो यदि मणिस्त्रपुणि प्रणिधीयते ।
न स विरौति न चापि न शोभते भवति योजयितुर्वचनीयता ॥२६४॥

मुकुटे रोपितः काचश्चरणाभरणे मणिः ।
नहि दोषो मणेरस्ति किंतु साधोरविज्ञता ॥२६५॥

बुद्धिमाननुरक्तोऽयमयं शूर इतो भयम् ।
इति भृत्यविचारज्ञो भृत्यैरापूर्यते नृपः ॥२६६॥

अश्वः शस्त्रं शास्त्रं वीणा वाणी नरश्च नारी च ।
पुरुषविशेषं प्राप्य हि भवन्ति योग्या अयोग्याश्च ॥२६७॥

किं भक्तेनासमर्थेन किं शक्तेनापकारिणा ।
भक्तं शक्तं च मां राजन्नावज्ञातुं त्वमर्हसि ॥२६८॥

अवज्ञानाद्राज्ञो भवति मतिहीनः परिजनः
ततस्तत्प्राधान्याद्भवति न समीपे बुधजनः ।
बुधैस्त्यक्ते राज्ये न हि भवति नीतिर्गुणवती,
विपन्नायां नीतौ सकलमवशं सीदति जगत् ॥२६९॥

जनं जनपदा नित्यमर्चयन्ति नृपार्चितम् ।
नृपेणावमतो यस्तु स सर्वैरवमन्यते ॥३००॥

बालादपि ग्रहीतव्यं युक्तमुक्तं मनीषिभिः ।
रवेरविषये किं न प्रदीपस्य प्रकाशनम् ॥३०१॥

पिङ्गलकोऽवदत्—'भद्र दमनक, किमेतत् । त्वमस्मदीयप्रधानामात्यपुत्र इयत्कालं यावत्कुतोऽपि खलवचनान्नागतोऽसि । इदानीं यथाभिमतं ब्रूहि ।'

दमनको ब्रूते—'देव, पृच्छामि किंचित् ।'

पिङ्गलको ब्रवीति—'उच्यताम् ।'

[टीका पु० पृ० ९७।३—९९।३]

दमनको ब्रूते—'उदकार्थी स्वामी पानीयमपीत्वा किमिति विस्मित इव तिष्ठति।'

पिङ्गलकोऽवदत्—'भद्रमुक्तं त्वया। किंत्वेतद्रहस्यं वक्तुं कश्चिद्विश्वासभूमिर्नास्ति। त्वं तु तद्विधः' इति कथयामि। शृणु—संप्रति वनमिदमपूर्वसत्त्वाधिष्ठितम्। ततोऽस्माकं त्याज्यम्। अनेन हेतुना विस्मितोऽस्मि। तथा च श्रुतस्त्वयापि अपूर्वः शब्दो महान्। शब्दानुरूपेणास्य प्राणिनो महता बलेन भवितव्यम्।'

दमनको ब्रूते—'देव, अस्ति तावदयं महान्भयहेतुः। स शब्दोऽस्माभिरप्याकर्णितः। किंतु स किंमन्त्री यः प्रथमं भूमित्यागं पश्चाद्युद्धं चोपदिशति। अस्मिन्कार्यसंदेहे भृत्यानामुपयोग एव ज्ञातव्यः। यतः—

बन्धुस्त्रीभृत्यवर्गस्य बुद्धेः सत्त्वस्य चात्मनः।
आपन्निकषपाषाणे नरो जानाति सारताम्॥ ३०२॥'

सिंहो ब्रूते—'भद्र, महती शङ्का मां बाधते।'

दमनकः पुनराह—(स्वगतम्—) 'अन्यथा राज्यसुखं परित्यज्य स्थानान्तरं गन्तुं कथं मां संभाषसे।' प्रकाशं ब्रूते—'देव, यावदहं जीवामि तावद्भयं न कर्तव्यम्। किंतु करटकादयोऽप्याश्वास्यन्ताम्। यस्मादापत्प्रतीकारकाले दुर्लभः पुरुषसमवायः।'

ततस्तौ **दमनककरटकौ** राज्ञा सर्वस्वेनापि पूजितौ भयप्रतीकारं प्रतिज्ञाय चलितौ।

करटको गच्छन्दमनकमाह—'सखे, 'किं शक्यप्रतीकारो भयहेतुरशक्यप्रतीकारो वा' इति न ज्ञात्वा भयोपशमं प्रतिज्ञाय कथमयं महाप्रसादो गृहीतः। यतोऽनुपकुर्वाणो न कस्याप्युपायनं गृह्णीयाद्, विशेषतो राज्ञः। पश्य—

[टीका पु० पृ० ६६।३—१०१।४]

यस्य प्रसादे पद्मास्ते विजयश्च पराक्रमे।
मृत्युश्च वसति क्रोधे सर्वतेजोमयो हि सः ॥ ३०३ ॥

तथा हि—

बालोऽपि नावमन्तव्यो 'मनुष्य' इति भूमिपः।
महती देवता ह्येषा नररूपेण तिष्ठति ॥ ३०४ ॥'

दमनको विहस्याह—'मित्र, तूष्णीमास्यताम्। ज्ञातं मया भयकारणम्। बलीवर्दनर्दितं तत्। वृषभाश्चास्माकमपि भक्ष्याः। किं पुनः सिंहस्य।'

करटको ब्रूते—'यद्येवं तदा स्वामित्रासस्तत्रैव किं नापनीतः।'

दमनको ब्रूते—'यदि स्वामित्रासस्तत्रैव मुच्यते तदा कथमयं महाप्रसादलाभः स्यात्। अपरं च—

निरपेक्षो न कर्तव्यो भृत्यैः स्वामी कदाचन।
निरपेक्षं प्रभुं कृत्वा भृत्यः स्याद्दधिकर्णवत् ॥ ३०५ ॥

करटकः पृच्छति 'कथमेतत्।'

दमनकः कथयति—

[९ म दधिकर्ण कथा--]

'अस्त्युत्तरापथेऽर्बुदशिखरनाम्नि पर्वते महाविक्रमो नाम सिंहः। तस्य पर्वतकन्दरमधिशयानस्य केसराग्रं कश्चिन्मूषिकः प्रत्यहं छिनत्ति। ततः [स केशरी] केसराग्रं लूनं दृष्ट्वा कुपितो विवरान्तर्गतं मूषिकमलभमानोऽचिन्तयत्—

'क्षुद्रशत्रुर्भवेद्यस्तु विक्रमान्नैव लभ्यते।
तमाहन्तुं पुरस्कार्यः सदृशस्तस्य सैनिकः ॥ ३०६ ॥'

इत्यालोच्य तेन ग्रामं गत्वा विश्वासं कृत्वा दधिकर्ण नामा बिडालो यत्नेनानीय मांसाहारं दत्त्वा स्वकन्दरे स्थापितः।

अनन्तरं तद्भयान्मूषकोऽपि बिलान्न निःसरति।

तेनासौ सिंहोऽक्षतकेसरः सुखं स्वपिति। मूषिकशब्दं यदा यदा शृणोति तदा तदा सविशेषं मांसाहारदानेन तं बिडालं संवर्धयति।

[टीका पु० पृ० १०१।४—१०४।१]

अथैकदा स मूषिकः क्षुधा पीडितो बहिः संचरन्बिडालेन प्राप्तो व्यापादितश्च ।

अनन्तरं स सिंहो यदा कदाचिदपि तस्य मूषिकस्य शब्दं विवरान्न शुश्राव, तदोपयोगाभावाद्बिडालस्याप्याहारदाने मन्दादरो बभूव ।

ततोऽसावाहारविरहाद्दुर्बलो दधिकर्णोऽवसन्नो बभूव ।

अतोऽहं ब्रवीमि—'निरपेक्षो न कर्तव्य ३०५' इत्यादि ॥

——:(०):——

ततो दमनककरटकौ संजीवकसमीपं गतौ ।

तत्र करटकस्तरुतले साटोपमुपविष्टः ।

दमनकः संजीवकसमीपं गत्वाऽब्रवीत्—'अरे वृषभ, एष राज्ञा पिङ्गलकेनारण्यरक्षार्थं नियुक्तः सेनापतिः करटकः समाज्ञापयति—'सत्वरमागच्छ । नोचेदस्मादरण्याद्दूरमपसर । अन्यथा ते विरुद्धं फलं भविष्यति । न जाने क्रुद्धः स्वामी किं विधास्यति ।'

ततो देशव्यवहारानभिज्ञःसंजीवकः सभयमुपसृत्य साष्टाङ्गपातं करटकं प्रणतवान् । तथा चोक्तम्—

मतिरेव बलाद्गरीयसी यदभावे करिणामियं दशा ।
इति घोषयतीव डिण्डिमः करिणो हस्तिपकाहतः क्वणन् ॥३०७॥

अथ संजीवकः सशङ्कमाह—'सेनापते, किं मया कर्तव्यम् । तदभिधीयताम् ।'

करटको ब्रूते—'यद्यत्र कानने स्थितत्याशास्ति तर्हि गत्वास्मद्देवपादारविन्दं प्रणम ।'

संजीवको ब्रूते—'तदभयवाचं मे यच्छ । गच्छामि । तदा स्वकीयदक्षिणबाहुं ददातु भवान् ।'

करटको ब्रूते—'शृणु रे बलीवर्द, अलमनया शङ्कया । यतः—

तृणानि नोन्मूलयते प्रभञ्जनो मृदूनि नीचैः प्रणतानि सर्वतः ।
समुच्छ्रितानेव तरून्प्रबाधते 'महान्महत्येव करोतिविक्रमम् ॥३०८॥'

[टीका पु० पृ० १०४।१—१०५।४]

प्रतिवाचमदत्त केशवः शपमानाय न चेदिभूभुजे ।
अनु हुं कुरुते घनध्वनिं न हि गोमायुरुतानि केसरी ॥३०९॥'

ततस्तौ दमनककरटकौ संजीवकं कियद्दूरे संस्थाप्य पिङ्गलकसमीपं गतौ ।

ततो राज्ञा सादरमवलोकितौ तौ प्रणम्योपविष्टौ ।

राजाह—'त्वया स दृष्टः ।'

दमनकोब्रूते—'देव, दृष्टः । यद्देवेन ज्ञातं तत्तथा महानेवासौ । किन्तु महाबलोऽसौ देवं द्रष्टुमिच्छति । ततः सज्जीभूयोपविश्य दृश्यताम् । शब्द मात्रादेव न भेतव्यम् । तथा चोक्तम्—

शब्दमात्रान्न भेतव्यमज्ञात्वा शब्दकारणम् ।
शब्दहेतुं परिज्ञाय कराला गौरवं गता ॥ ३१० ॥'

राजाह—'कथमेतत् ।'

दमनकः कथयति—

[१० म कराला वेश्या वानर घण्टा कथा]

'अस्ति श्रीपर्वतमध्ये ब्रह्मपुराख्यं नगरम् । तच्छिखरप्रदेशे घण्टाकर्णो नाम राक्षसः प्रतिवसतीति जनप्रवादः सदा श्रूयते ।

एकदा घण्टामादाय पलायमानः कश्चिच्चौरो व्याघ्रेण व्यापादितः खादितश्च ।

तत्पाणिपतिता घण्टा वानरैः प्राप्ता ।

ते च वानरास्तां घण्टामनुक्षणं वादयन्ति ।

ततो नगरजनैः स मनुष्यः खादितो दृष्टः । प्रतिक्षणं घण्टारवश्च श्रूयते ।

अनन्तरं 'घण्टाकर्णः कुपितो मनुष्यान् खादति घण्टां च वादयति' इत्युक्त्वा सर्वे जना नगरात्पलायिताः ।

ततः करालया नाम स्त्रिया विमृश्य 'अनवसरोऽयं घण्टावादः, तत्किं मर्कटा घण्टां वादयन्ति' इति स्वयं विज्ञाय राजा विज्ञापितः—'देव, यदि कियद्धनोपक्षयः क्रियते, तदाहमेनं घण्टाकर्णं साधयामि ।'

[टीका पु० पृ० १०५।४—१०८।१]

ततो राज्ञा तस्यै धनं दत्तम् ।

करालया च मण्डलं कृत्वा तत्र गणेशादिपूजागौरवं दर्शयित्वा स्वयं वानरप्रियफलान्यादाय वनं प्रविश्य फलान्याकीर्णानि ।

ततो घण्टां परित्यज्य वानराः फलासक्ता बभूवुः ।

कराला च घण्टां गृहीत्वा नगरमागता सर्वजनपूज्याभवत् ।'

अतोऽहं ब्रवीमि—'शब्दमात्रान्न भेतव्यम्' ३१० इत्यादि ॥

—:०:—

ततः संजीवक आनीय दर्शनं कारितः । पश्चात्तत्रैव परमप्रीत्या निवसति ।

अथ कदाचित्तस्य सिंहस्य भ्राता स्तब्धकर्णनामा सिंहः समागतः । तस्यातिथ्यं कृत्वा समुपवेश्य पिङ्गलकस्तदाहाराय पशुं हन्तुं चलितः ॥

अत्रान्तरे संजीवको वदति—देव, अद्य हतमृगाणां मांसानि क्व ।'

राजाह—'दमनककरटकौ जानीतः ।'

संजीवको ब्रूते—'ज्ञायताम्—किमस्ति, नास्ति वा ।'

सिंहो विमृश्याह—'नास्त्येव तत् ।'

संजीवको ब्रूते—'कथमेतावन्मांसं ताभ्यां खादितम् ।'

राजाह—'खादितं व्ययितमवधीरितं च । प्रत्यहमेष क्रमः ।'

संजीवको ब्रूते—'कथं श्रीमद्देवपादानामगोचरेणैव क्रियते ।'

राजाह—'मदीयागोचरेणैव क्रियते' ।

अथ संजीवको ब्रूते—'नैतदुचितम् । तथा चोक्तम्—

नानिवेद्य प्रकुर्वीत भर्तुः किंचिदपि स्वयम् ।
कार्यमापत्प्रतीकारादन्यत्र जगतीपतेः ॥३११॥

कमण्डलूपमोऽमात्यस्तनुत्यागो बहुग्रहः ।
नृपते किंक्षणो मूर्खो दरिद्रः किंवराटकः ॥३१२॥

स ह्यमात्यः सदा श्रेयान्काकिनीं यः प्रवर्धयेत् ।
कोषः कोषवतः प्राणाः प्राणाः प्राणा न भूपतेः ॥३१३॥

किं चान्यैर्न कुलाचारैः सेव्यतामेति पूरुषः ।
धनहीनः स्वपत्न्यापि त्यज्यते किं पुनः परैः ॥३१४॥

[टीका पु० पृ० १०८।१—१११।१]

एतच्च राज्ये प्रधानं दूषणम्—

अतिव्ययोऽनवेक्षा च तथार्जनमधर्मतः।
मोषणं दूरसंस्थानं कोषव्यसनमुच्यते ॥ ३१५ ॥
क्षिप्रमायमनालोच्य व्ययमानः स्ववाञ्छया।
परिक्षीयत एवासौ धनी वैश्रवणोपमः ॥ ३१६ ॥'

स्तब्धकर्णो ब्रूते—'शृणु भ्रातः, चिराश्रितावेतौ दमनककरटकौ संधिविग्रहकार्याधिकारिणौ च कदाचिदर्थाधिकारे न नियोक्तव्यौ। अपरं च नियोगप्रस्तावे यत्किञ्चिन्मया श्रुतम्, तत्कथ्यते—

ब्राह्मणः क्षत्रियो बन्धुर्नाधिकारे प्रशस्यते।
ब्राह्मणः सिद्धमप्यर्थं कृच्छ्रेणापि न यच्छति ॥ ३१७ ॥
नियुक्तः क्षत्रियो द्रव्ये खड्गं दर्शयते ध्रुवम्।
सर्वस्वं ग्रसते बन्धुराक्रम्य ज्ञातिभावतः ॥ ३१८ ॥
अपराधेऽपि निःशङ्को नियोगी चिरसेवकः।
स स्वामिनमवज्ञाय चरेच्च निरवग्रहः ॥ ३१९ ॥
उपकर्ताधिकारस्थः स्वापराधं न मन्यते।
उपकारं ध्वजीकृत्य सर्वमेव विलुम्पति ॥ ३२० ॥
सपांशुक्रीडितोऽमात्यः स्वयं राजायते यतः।
अवज्ञा क्रियते तेन सदा परिचयाद् ध्रुवम् ॥ ३२१ ॥
अन्तर्दुष्टः क्षमायुक्तः सर्वानर्थकरः किल।
शकुनिः शकटारश्च दृष्टान्तावत्र भूपते ॥ ३२२ ॥
सदायत्योमसाध्यः स्यात्समृद्धः सर्व एव हि।
सिद्धानामयमादेश ऋद्धिश्चित्तविकारिणी ॥ ३२३ ॥
प्राप्तार्थाग्रहणं द्रव्यपरीवर्तोऽनुरोधनम्।
उपेक्षा बुद्धिहीनत्वं भोगोऽमात्यस्य दूषणम् ॥ ३२४ ॥
नयोग्यर्थग्रहोपायो राज्ञां नि (नी) त्यपरीक्षणम्।
प्रतिपत्तिप्रदानं च तथा कर्मविपर्ययः ॥ ३२५ ॥

[टीका पु० पृ० १११।१—११३।१]

नापीडिता वमन्त्युच्चैरन्तःसारं महीपतेः ।
दुष्टव्रणा इव प्रायो भवन्ति हि नियोगिनः ॥ ३२६ ॥

मुहुर्नियोगिनो बाध्या वसुधारा महीपतेः ।
सकृत्किं पीडितं स्नानवस्त्रं मुञ्चेद् बहूदकम् ॥ ३२७ ॥

एतत्सर्वं यथावसरं ज्ञात्वा व्यवहर्तव्यम् ।'

पिङ्गलको ब्रूते—'अस्ति तावदेवम् । किंत्वेतौ सर्वथा न मम वचनकरौ।'

स्तब्धकर्णो ब्रूते—'एतत्सर्वथाऽनुचितम् । यतः—

आज्ञाभङ्गकरान् राजा न क्षमेत सुतानपि ।
विशेषः को नु राज्ञश्च राज्ञश्चित्रगतस्य च ॥ ३२८ ॥

स्तब्धस्य नश्यति यशो विषमस्य मैत्री,
नष्टेन्द्रियस्य कुलमर्थपरस्य धर्मः ।
विद्याफलं व्यसनिनः, कृपणस्य सौख्यं,
राज्यं प्रमत्तसचिवस्य नराधिपस्य ॥ ३२९ ॥

तस्करेभ्यो नियुक्तेभ्यः शत्रुभ्यो नृपवल्लभात् ।
नृपतिर्निजलोभाच्च प्रजा रक्षेत्पितेव हि ॥ ३३० ॥

भ्रातः, सर्वथास्मद्वचनं क्रियताम् । व्यवहारोऽप्यस्माभिः कृत एव । अयं संजीवकः सस्यभक्षकोऽर्थाधिकारे नियुज्यताम् ।'

एतद्वचनात्तथानुष्ठिते सति तदारभ्य पिङ्गलकसंजीवकयोः सर्वबन्धुपरित्यागेन महता स्नेहेन कालोऽतिवर्तते ।

ततोऽनुजीविनामप्याहारदाने शैथिल्यदर्शनाद्दमनककरटकावन्योन्यं चिन्तयतः ।

तदाह दमनकः करटकम्—'मित्र, किं कर्तव्यम् । आत्मकृतोऽयं दोषः । स्वयं कृतेऽपि दोषे परिदेवनमप्यनुचितम् । (क्षणं विमृश्य) मित्र, सहसैव यथानयोः सौहार्दं मया कारितम्, तथा मित्रभेदोऽपि मया कार्यः ।

[टीका पु० पृ० ११३।२—११४।४]

यतः—

अतथ्यान्यपि तथ्यानि दर्शयन्त्यतिपेशलाः ।
समे निम्नोन्नतानीव चित्रकर्मविदो जनाः ॥ ३३१ ॥

करटको ब्रूते—'अस्त्वेवम्। किंत्वनयोर्महानन्योन्यनिसर्गोपजातस्नेहः कथं भेदयितुं शक्यः।'

दमनको ब्रूते—'उपायः क्रियताम्। तथा चोक्तम्—

उपायेन हि यच्छक्यं न तच्छक्यं पराक्रमैः ।
काकः कनकसूत्रेण कृष्णसर्पमघातयत् ॥ ३३२ ॥'

करटकः पृच्छति—'कथमेतत्।'

दमनकः कथयति—

[११ शा काक कृष्णसर्प कथा—]

'कस्मिंश्चित्तरौ वायसदम्पती निवसतः। तयोश्चापत्यानि तत्कोटरावस्थितेन कृष्णसर्पेण खादितानि। ततः पुनर्गर्भवती वायसी वायसमाह—'नाथ, त्यज्यतामयं तरुः। अत्र यावत्कृष्णसर्पोऽस्ति तावदावयोः संततिः कदाचिदपि न भविष्यति। यतः—

दुष्टा भार्या शठं मित्रं भृत्यश्चोत्तरदायकः ।
ससर्पे च गृहे वासो मृत्युरेव न संशयः ॥ ३३३ ॥'

वायसो ब्रूते—'प्रिये, न भेतव्यम्। वारंवारं मयैतस्य महानपराधः सोढः। इदानीं पुनर्न क्षन्तव्यः।'

वायस्याह—'कथमेतेन बलवता सार्धं भवान्विग्रहीतुं समर्थः।'

वायसो ब्रूते—'अलमनया शङ्कया। यतः—

बुद्धिर्यस्य बलं तस्य निर्बुद्धेस्तु कुतो बलम् ।
पश्य सिंहो मदोन्मत्तः शशकेन निपातितः ॥ ३३४ ॥'

वायसी विहस्याह—'कथमेतत्।'

वायसः कथयति—

[टीका पु० पृ० ११४।४—११६।४]

[१२ श शशक सिंह कथा—]

'अस्ति मन्दरनाम्नि पर्वते दुर्दान्तो नाम सिंहः। स च सर्वदा पशूनां वधं कुर्वन्नास्ते।

ततः सर्वैः पशुभिर्मिलित्वा स सिंहो विज्ञप्तः—'मृगेन्द्र, किमर्थमेकदा बहुपशुघातः क्रियते। यदि प्रसादो भवति तदा वयमेव भवदाहारार्थं प्रत्यहमेकैकं पशुमुपढौकयामः।'

ततः सिंहेनोक्तम्—'यद्येतदभिमतं भवतां तर्हि भवतु तत्।'

ततः प्रभृत्येकैकं पशुमुपकल्पितं भक्षयन्नास्ते।

अथ कदाचिद्वृद्धशशकस्य कस्यचिद्वारः समायातः। सोऽचिन्तयत्—

'त्रासहेतोर्विनीतिस्तु क्रियते जीविताशया।
पञ्चत्वं चेद्गमिष्यामि किं सिंहानुनयेन मे॥ ३३५॥

तन्मन्दं मन्दं गच्छामि।'

ततः सिंहोऽपी क्षुधा पीडितः कोपात्तमुवाच—'कुतस्त्वं विलम्बादागतोऽसि।'

शशकोऽब्रवीत्—'देव, नाहमपराधी। आगच्छन् पथि सिंहान्तरेण बलाद्धृतः। तस्याग्रे पुनरागमनाय शपथं कृत्वा स्वामिनं निवेदयितुमत्रागतोऽस्मि।'

सिंहः सकोपमाह—'सत्वरं गत्वा दुरात्मानं दर्शय क्व स दुरात्मा तिष्ठति।'

ततः शशकस्तं गृहीत्वा गभीरकूपं दर्शयितुं गतः। 'अत्रागत्य स्वयमेव पश्यतु स्वामी' इत्युक्त्वा तस्मिन्कूपजले तस्य सिंहस्यैव प्रतिबिम्बं दर्शितवान्।

ततोऽसौ सिंहः क्रोधाध्मातो दर्पात्तस्योपर्यात्मानं निक्षिप्य पञ्चत्वं गतः॥'

अतोऽहं ब्रवीमि—'बुद्धिर्यस्य' ३३४ इत्यादि॥

—:o:—

वायस्याह—'श्रुतं मया सर्वम्। संप्रति यथा कर्तव्यं तद् ब्रूहि।

वायसोऽवदत्—'अत्रासन्ने सरसि राजपुत्रः प्रत्यहमागत्य स्नाति। स्नानसमये तदङ्गादवतारितं तीर्थशिलानिहितं कनकसूत्रं चञ्च्वाऽवधृत्यानीयास्मिन्कोटरे धारयिष्यसि।

[टीका पु० पृ० ११८।४—११९।१]

अथ कदाचित्स्नातुं जलं प्रविष्टे राजपुत्रे वायस्या तदनुष्ठितम् । अथ कनकसूत्रानुसरणप्रवृत्तै राजपुरुषैस्तत्र तरुकोटरे कृष्णसर्पो दृष्टो व्यापादितश्च ।

अतोऽहं ब्रवीमि—'उपायेन हि यच्छक्यम्' ३३२ इत्यादि ॥

करटको ब्रूते—'यद्येवं तर्हि गच्छ । शिवास्ते सन्तु पन्थानः ।'

ततो दमनकः पिङ्गलकसमीपं गत्वा प्रणम्योवाच--'देव, आत्ययिकं किमपि महाभयकारि मन्यमानः समागतोऽस्मि । यतः—

आपद्युन्मार्गगमने कार्यकालात्ययेषु च ।
कल्याणवचनं ब्रूयादपृष्टोऽपि हितो नरः ॥ ३३६ ॥
भोगस्य भाजनं राजा मन्त्री कार्यस्य भाजनम् ।
राजकार्यपरिध्वंसी मन्त्री दोषेण लिप्यते ॥ ३३७ ॥

अमात्यानामेष क्रमः—

वरं प्राणपरित्यागः शिरसो वापि कर्तनम् ।
न तु स्वामिपदावाप्तिपातकेच्छोरुपेक्षणम् ॥ ३३८ ॥

पिङ्गलकः सादरमाह—'अथ भवान्किं वक्तुमिच्छति ।'

दमनको ब्रूते—'देव, संजीवकस्तवोपर्यसदृशव्यवहारीव लक्ष्यते । तथा चास्मत्संनिधाने श्रीमद्देवपादानां शक्तित्रयनिन्दां कृत्वा राज्यमेवाभिलषति।'

एतच्छ्रुत्वा पिङ्गलकः सभयं साश्चर्यं तूष्णीं स्थितः ।

दमनकः पुनराह-- देव सर्वामात्यपरित्यागं कृत्वैक एवायं संजीवको य[...]त्वया सर्वाधिकारी कृतः, स एव दोषः । यतः—

अत्युच्छ्रिते मन्त्रिणि पार्थिवे च विष्टभ्य पादावुपतिष्ठते श्रीः ।
सा स्त्रीस्वभावादसहा भरस्य तयोर्द्वयोरेकतरं जहाति ॥ ३३९ ॥
एकं भूमिपतिः करोति सचिवं राज्ये प्रमाणं यदा,
तं मोहाच्छ्रयते मदः स च मदालस्येन निर्भिद्यते ।

[टीका पु० पृ० ११६।१—१२०।४]

निर्भिन्नस्य पदं करोति हृदये तस्य स्वतन्त्रस्पृहा,
स्वातन्त्र्यस्पृहया ततः स नृपतेः प्राणान्तिकं द्रुह्यति ॥ ३४० ॥
विषदिग्धस्य भक्तस्य दन्तस्य चलितस्य च ।
अमात्यस्य च दुष्टस्य मूलादुद्धरणं सुखम् ॥ ३४१ ॥
यः कुर्यात् सचिवायत्तां श्रियं तद्व्यसने सति ।
सोऽन्धवज्जगतीपालः सीदेत्संचारकैर्विना ॥ ३४२ ॥

स च सर्वकार्येषु स्वेच्छातः प्रवर्तते । तदत्र प्रमाणं स्वामी ।'

सिंहो विमृश्याह—'भद्र, यद्यप्येवं तथापि संजीवकेन सह मम महान्स्नेहः । पश्य—

कुर्वन्नपि व्यलीकानि यः प्रियः प्रिय एव सः ।
अशेषदोषदुष्टोऽपि कायः कस्य न वल्लभः ॥ ३४३ ॥
अप्रियाण्यपि कुर्वाणो यः प्रियः प्रिय एव सः ।
दग्धमन्दिरसारेऽपि कस्य वह्नावनादरः ॥ ३४४ ॥'

दमनको वदति—'देव, स एव दोषः । यतः—

यस्मिन्नेवाधिकं चक्षुरारोपयति पार्थिवः ।
सुतेऽमात्येऽप्युदासीने स लक्ष्म्याऽऽश्रीयते जनः ॥ ३४५ ॥

शृणु देव—

अप्रियस्यापि पथ्यस्य परिणामः सुखावहः ।
वक्ता श्रोता च यत्रास्ति रमन्ते तत्र संपदः ॥ ३४६ ॥

त्वया च मूलभृत्यानपास्यायमागन्तुकः पुरस्कृतः । एतच्चानुचितं कृतम् । यतः—

मूलभृत्यान्परित्यज्य नागन्तून्प्रति मानयेत् ।
नातः परतरो दोषो राज्यभेदकरो यतः ॥ ३४७ ॥'

सिंहो ब्रूते—'किं महदाश्चर्यम् । यो मयायमभयवाचं दत्त्वानीतः संवर्धितश्च स कथं मह्यं द्रुह्यति ।'

[टीका पु० पृ० १२०।४—१२२।३]

दमनको ब्रूते—'देव—

दुर्जनः प्रकृतिं याति सेव्यमानोऽपि नित्यशः ।
स्वेदनाभ्यञ्जनोपायैः श्वपुच्छमिव नामितम् ॥ ३४८ ॥
स्वेदितो मर्दितश्चैव रज्जुभिः परिवेष्टितः ।
मुक्तो द्वादशभिर्वर्षैः श्वपुच्छः प्रकृतिं गतः ॥ ३४९ ॥
वर्धनं वाथ सम्मानं खलानां प्रीतये कुतः ।
फलन्त्यमृतसेकेऽपि न पथ्यानि विषद्रुमाः ॥ ३५० ॥

अतोऽहं ब्रवीमि—

अपृष्टोऽपि हितं ब्रूयाद्यस्य नेच्छेत्पराभवम् ।
एष एव सतां धर्मो विपरीतमतोऽन्यथा ॥ ३५१ ॥

तथा चोक्तम्—

स स्निग्धोऽकुशलान्निवारयति यस्तत्कर्म यन्निर्मलं,
सा स्त्री यानुविधायिनी, स मतिमान्यः सद्भिरभ्यर्च्यते ।
सा श्रीर्या न मदं करोति, स सुखी यस्तृष्णया मुच्यते,
तन्मित्रं यदकृत्रिमं, स पुरुषो यः खिद्यते नेन्द्रियैः ॥३५२॥

यदि संजीवकव्यसनार्दितो विज्ञापितोऽपि स्वामी न निवर्तते तदेदृशो भृत्यस्य न दोषः । तथा च—

नृपः कामासक्तो गणयति न कार्यं न च हितं,
यथेष्टं स्वच्छन्दः प्रविचरति मत्तो गज इव ।
ततो मानाध्मातः स पतति यदा शोकगहने,
तदा भृत्ये दोषान्क्षिपति न निजं वेत्त्यविनयम् ॥३५३॥,

पिङ्गलकः (स्वगतम्)—

'न परस्यापवादेन परेषां दण्डमाचरेत् ।
आत्मनावगमं कृत्वा बध्नीयात्पूजयेत वा ॥ ३५४ ॥
गुणदोषावनिश्चित्य विधिर्न ग्रहनिग्रहे ।
स्वनाशाय यथा न्यस्तो दर्पात्सर्पमुखे करः ॥ ३५५ ॥

[टीका पु० पृ० १२२।३—१२४।४]

(प्रकाशं) ब्रूते—तदा संजीवकः किं प्रत्या दिश्यताम् ।'

दमनकःससंभ्रममाह—'देव, मा मैवम् । एतावता मन्त्रभेदो जायते तथा चोक्तम्—

मन्त्रबीजमिदं गुप्तं रक्षणीयं तथा यथा ।
मनागपि न भिद्येत तद्भिन्नं न प्ररोहति ॥ ३५६ ॥
आदेयस्य प्रदेयस्य कर्तव्यस्य च कर्मणः ।
क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम् ॥ ३५७ ॥

तदावश्यं समारब्धं महता प्रयत्नेन संपादनीयम् । किं च—

मन्त्रो योध इवाधीरः सर्वाङ्गैः संवृतैरपि ।
चिरं न सहते स्थातुं परेभ्यो भेदशङ्कया ॥ ३५८ ॥

यद्यसौ दृष्टदोषोऽपि दोषान्निवर्त्य संधातव्यः, तदतीवानुचितम् । यतः—

सकृद्दुष्टं तु यो मित्रं पुनः संधातुमिच्छति ।
स मृत्युमेव गृह्णाति गर्भमश्वतरी यथा ॥ ३५९ ॥'

सिंहो ब्रूते—'ज्ञायतां तावत्किमस्माकमसौ कर्तुं समर्थः ।'

दमनक आह—'देव—

अङ्गाङ्गिभावमज्ञात्वा कथं सामर्थ्यनिर्णयः ।
पश्य टिट्टिभिमात्रेण समुद्रो व्याकुलीकृतः ॥ ३६० ॥'

सिंहः पृच्छति—'कथमेतत् ।'

दमनकः कथयति—

[१३ श-टिट्टिभ समुद्र कथा--]

'दक्षिणसमुद्रतीरे टिट्टिभदंपती निवसतः । तत्र चासन्नप्रसवा टिट्टिभी भर्तारमाह—'नाथ, प्रसवयोग्यस्थानं निभृतमनुसंधीयताम् ।'

टिट्टिभोऽवदत्—'भार्ये, नन्विदमेव स्थानं प्रसूतियोग्यम् ।'

सा ब्रूते—'समुद्रवेलया प्लाव्यते स्थानमेतत् ।'

टिट्टिभोऽवदत्—'किमहं निर्बलः येन स्वगृहावस्थितः समुद्रेण निग्रहीतव्यः ।'

[टीका पु० पृ० १२४।१ — १२६।४]

टिट्टिभी विहस्याह—'स्वामिन्, त्वया समुद्रेण च महदन्तरम् ।
दुःखमात्मा परिच्छेत्तुमेवं योग्यो न वेति वा ।
अस्तीदृग्यस्य विज्ञानं स कृच्छ्रेऽपि न सीदति ॥३६१॥
अनुचितकार्यारम्भः स्वजनविरोधो बलीयसा स्पर्धा ।
प्रमदाजनविश्वासो मृत्योर्द्वाराणि चत्वारि ॥३६२॥'

ततः (कृच्छ्रेण) स्वामिवचनात्तत्रैव प्रसूता सा ।

एतत्सर्वं श्रुत्वा समुद्रेणापि तच्छक्तिज्ञानार्थं तदण्डान्यपहृतानि ।

ततष्टिट्टिभी शोकार्ता भर्तारमाह—'नाथ, कष्टमापतितम् । तान्यण्डानि मे नष्टानि ।'

टिट्टिभोऽवदत्—'प्रिये मा भैषीः ।' इत्युक्त्वा पक्षिणां मेलकं कृत्वा पक्षिस्वामिनो गरुडस्य समीपं गतः ।

तत्र गत्वा सकलवृत्तान्तः टिट्टिभेन भगवतो गरुडस्य पुरतो निवेदितः—'देव, समुद्रेणाहं स्वगृहावस्थितो विनापराधेनैव विगृहीत' इति ।

ततस्तद्वचनमाकर्ण्य गरुत्मता प्रभुर्भगवान्नारायणः सृष्टिस्थितप्रलयहेतुर्विज्ञप्तः ।

स समुद्रमण्डदानायादिदेश ।

ततो भगवदाज्ञां मौलौ निधाय समुद्रेण तान्यण्डानि टिट्टिभाय समर्पितानि ॥'

अतोऽहं ब्रवीमि—'अङ्गाङ्गिभावमज्ञात्वा'३६० इत्यादि ॥

—:0:—

राजाह—'कथमसौ ज्ञातव्यो द्रोहबुद्धिरिति ।'

दमनको ब्रूते—'यदासौ सदर्पः शृङ्गाग्रप्रहरणोऽभिमुखश्चकित इवागच्छति तदा ज्ञास्यति स्वामी ।' एवमुक्त्वा संजीवकसमीपं गतः ।

तत्र गतश्च मन्दं मन्दमुपसर्पन्विस्मितमिवात्मानमदर्शयत् ।

संजीवकेन सादरमुक्तम्—'भद्र, कुशलं ते ।'

[टीका पु० पृ० १२६।४—१२८।३]

दमनको ब्रूते—'अनुजीविनां कुतः कुशलम् । यतः—

संपत्तयः पराधीनाः सदा चित्तमनिर्वृतम् ।
स्वजीवितेऽप्यविश्वासस्तेषां ये राजसंश्रयाः ॥३६३॥

कोऽर्थान्प्राप्य न गर्वितो, विषयिणः कस्यापदोऽस्तं गताः,
स्त्रीभिः कस्य न खण्डितं भुवि मनः, को वास्ति राज्ञां प्रियः ।
कः कालस्य भुजान्तरं न च गतः, कोऽर्थी गतो गौरवं,
को वा दुर्जनवागुरासु पतितः क्षेमेण यातः पुमान् ॥३६४॥'

संजीवकेनोक्तम्—'सखे, ब्रूहि किमेतत् ।'

दमनक आह—'किं ब्रवीमि मन्दभाग्यः । पश्य—

यथा समुद्रे निर्मग्नो लब्ध्वा सर्पावलम्बनम् ।
न मुञ्चति न चादत्ते तथा मुग्धोऽस्मि संप्रति ॥३६५॥

यतः—

एकत्र राजविश्वासो नश्यत्यन्यत्र बान्धवः ।
किं करोमि क्व गच्छामि पतितो दुःखसागरे ॥३६६॥'

इत्युक्त्वा दीर्घं निःश्वस्योपविष्टः ।

संजीवकोऽब्रूते—'तथापि मित्र, सविस्तरं मनोगतमुच्यताम् ।'

दमनकः सुनिभृतमाह—'यद्यपि राजविश्वासो न कथनीयस्तथापि भवानस्मदीयप्रत्ययादागतः । मया परलोकार्थिनावश्यं तव हितमाख्येयम् । शृणु—अयं स्वामी तवोपरि विकृतबुद्धी रहस्युक्तवान्—संजीवकमेव हत्वा स्वपरिवारं तर्पयामि ।'

एतच्छ्रुत्वा संजीवकः परं विषादमगमत् ।

दमनकः पुनराह—'अलं विषादेन । प्राप्तकालकार्यमनुष्ठीयताम् ।'

संजीवकः (स्वगतम्)—'तत् किमिदमेतद्विचेष्टितम्, नवा' इत्येतद् व्यवहारान्निर्णेतुं न शक्यते । यतः—

कश्चिदाश्रयसौन्दर्याद्धत्ते शोभामसज्जनः ।
प्रमदालोचनन्यस्तं मलीमसमिवाञ्जनम् ॥३६७॥

[टीका पु० पृ० १२८।४—१३०।३]

इति विचिन्त्योक्तम्—'कष्टं' किमिदमापतितम् । यतः—

आराध्यमानो नृपतिः प्रयत्ना-
न्न तोषमायाति किमत्र चित्रम् ।
अयं त्वपूर्वप्रतिमाविशेषो
यः सेव्यमानो रिपुतामुपैति ॥ ३६८ ॥

तदयमशक्यार्थः प्रमेयः । यतः—

निमित्तमुद्दिश्य हि यः प्रकुप्यति
ध्रुवं स तस्यापगमे प्रसीदति ।
अकारणद्वेषि मनस्तु यस्य वै
कथं जनस्तं परितोषयिष्यति ॥ ३६९ ॥

किं मयापकृतं राज्ञः । अथवा निर्निमित्तापकारिणश्च भवन्ति राजानः ।'

दमनको ब्रूते—'एवमेतत् । शृणु—

विज्ञैः स्निग्धैरुपकृतमपि द्वेष्यतामेति किंचि-
त्साक्षादन्यैरपकृतमपि प्रीतिमेवोपयाति ।
चित्रं चित्रं किमपि चरितं नैकभावाश्रयाणां
सेवाधर्मः परमगहनो योगिनामप्यगम्यः ॥ ३७० ॥

कृतशतमसत्सु नष्टं, सुभाषितशतं च नष्टमबुधेषु ।
वचनशतमवचनकरे, बुद्धिशतमचेतने नष्टम् ॥ ३७१ ॥

चन्दनतरुषु भुजंगा, जलेषु कमलानि, तत्र च ग्राहाः ।
गुणघातिनश्च भोगे खला, न च सुखान्यविघ्नानि ॥ ३७२ ॥

मूलं भुजंगैः, कुसुमानि भृङ्गैः, शाखा प्लवङ्गैः, शिखरा विहङ्गैः ।
नास्त्येव तच्चन्दनपादपस्य यन्नाश्रितं दुष्टतरैश्च हिंस्रैः ॥ ३७३ ॥

अयं तावत्स्वामी वाङ्मधुरो विषहृदयो मया ज्ञातः । यतः—

दूरादुच्छ्रितपाणिरार्द्रनयनः प्रोत्सारितार्धासनो
गाढालिङ्गनतत्परः प्रियकथाप्रश्नेषु दत्तादरः ।

[टीका पु० पृ० १३०।३—१३२।३]

अन्तर्भूतविषो बहिर्मधुमयश्चातीव मायापटुः
को नामायमपूर्वनाटकविधिर्यः शिक्षितो दुर्जनैः ॥३७४॥
पोतो दुस्तरवारिराशितरणे, दीपोऽन्धकारागमे
निर्वाते व्यजनं मदान्धकरिणां दर्पोपशान्त्यै सृणिः।
इत्थं तद्भुवि नास्ति यस्य विधिना नोपायचिन्ता कृता
मन्ये दुर्जनचित्तवृत्तिहरणे धातापि भग्नोद्यमः ॥३७५॥

संजीवकः पुनर्निःश्वस्याह—'कष्टं भोः। कथमहं सस्यभक्षकः सिंहेन निपातयितव्यः। यतः—

ययोरेव समं वित्तं ययोरेव समं बलम्।
तयोर्विवादो मन्तव्यो नोत्तमाधमयोः क्वचित् ॥ ३७६ ॥

(पुनर्विचिन्त्य) केनायं राजा ममोपरि विकारितो न जाने। भेदमुपगताद्राज्ञः सदा भेतव्यम्। यतः—

मन्त्रिणा पृथिवीपालचित्तं विघटितं क्वचित्।
वलयं स्फटिकस्येव कोऽस्ति संधातुमीश्वरः ॥ ३७७ ॥
वज्रं च राजतेजश्च द्वयमेवातिभीषणम्।
एकमेकत्र पतति पतत्यन्यत्समन्ततः ॥ ३७८ ॥

तत्संग्रामे मृत्युरेवाश्रीयताम्। इदानीं तदाज्ञानुवर्तनमयुक्तम्। यतः—

मृतः प्राप्नोति वा स्वर्गं शत्रुं हत्वा सुखानि वा।
उभावपि हि शूराणां गुणावेतौ सुदुर्लभौ ॥ ३७९ ॥

युद्धकालश्चायम्—

यत्राऽयुद्धे ध्रुवं मृत्युर्युद्धे जीवितसंशयः।
तमेव कालं युद्धस्य प्रवदन्ति मनीषिणः ॥ ३८० ॥
अयुद्धे हि यदा पश्येन्न किंचिद्धितमात्मनः।
युध्यमानस्तदा प्राज्ञो म्रियते रिपुणा सह ॥ ३८१ ॥

[टीका पु० पृ० १३२।३—१३४।३]

जये च लभते लक्ष्मीं मृतेनापि सुराङ्गनाम् ।
क्षणविध्वंसिनः कायाः का चिन्ता मरणे रणे ॥ ३८२ ॥'

एतच्चिन्तयित्वा संजीवकः आह—'भो मित्र, कथय कथमसौ मां जिघांसुर्ज्ञातव्यः ।'

दमनको ब्रूते—'यदासौ समुद्धूतलाङ्गूल उन्नतचरणो विवृतास्यस्त्वां पश्यति तदा त्वमपि स्वविक्रमं दर्शयिष्यसि । यतः—

बलवानपि निस्तेजाः कस्य नाभिभवास्पदम् ।
निःशङ्कं दीयते लोकैः पश्य भस्मचये पदम् ॥ ३८३ ॥

किंतु सर्वमेतत्सुगुप्तमनुष्ठातव्यम् । नो चेन्न त्वं नाहम्' इत्युक्त्वा दमनकः करटकसमीपं गतः ।

करटकेनोक्तम्—'किं निष्पन्नम् ।'

दमनकेनोक्तम्—'निष्पन्नोऽसावन्योन्यभेदः ।'

करटको ब्रूते—'कोऽत्र संदेहः । यतः—

बन्धुः को नाम दुष्टानां कुप्येत्को नातियाचितः ।
को न दृप्यति वित्तेन कुकृत्ये को न पण्डितः ॥ ३८४ ॥
दुर्वृत्तः क्रियते धूर्तैः श्रीमानात्मविवृद्धये ।
किं नाम खलसंसर्गः कुरुते नाश्रयाशवत् ॥ ३८५ ॥'

ततो दमनकः पिङ्गलकसमीपं गत्वाह—'देव, समागतोऽसौ पापाशयः । तत्सज्जीभूय स्थीयताम्' इत्युक्त्वा पूर्वोक्तमाकारं कारयामास । संजीवकोऽप्यागत्य तथाविधं विकृताकारं सिंहं दृष्ट्वा स्वानुरूपं विक्रमं चकार ।

ततस्तयोः प्रवृत्ते महाहवे संजीवकः सिंहेन व्यापादितः ॥

अथ पिङ्गलकः संजीवकं व्यापाद्य विश्रान्तः सशोक इव तिष्ठति । ब्रूते च—'किं मया दारुणं कर्म कृतम् ! यतः—

परैः संभुज्यते राज्यं स्वयं पापस्य भाजनम् ।
धर्मातिक्रमतो राजा सिंहो हस्तिवधादिव ॥ ३८६ ॥

[टीका पु० पृ० १३४।३—१३५।५]

भूम्येकदेशस्य गुणान्वितस्य
भृत्यस्य वा बुद्धिमतः प्रणाशे ।
भृत्यप्रणाशो मरणं नृपाणां
नष्टापि भूमिः सुलभा न भृत्याः ॥३८७॥'

दमनको ब्रूते—'स्वामिन्, कोऽयं नूतनो न्यायो यदरातिं हत्वा संतापः क्रियते । तथा चोक्तम्—

पिता वा यदि वा भ्राता पुत्रो वा यदि वा सुहृत् ।
प्राणच्छेदकरो राज्ञा हन्तव्यो भूतिमिच्छता ॥ ३८८ ॥
धर्मार्थकामतत्त्वज्ञो नैकान्तकरुणो भवेत् ।
न हि हस्तस्थमप्यन्नं क्षमावान् रक्षितुं क्षमः ॥ ३८९ ॥
क्षमा शत्रौ च मित्रे च यतीनामेव भूषणम् ।
अपराधिषु सत्त्वेषु नृपाणां सैव दूषणम् ॥ ३९० ॥
राज्यलोभादहङ्कारादिच्छेद्यः स्वामिनः पदम् ।
प्रायश्चित्तं तु तस्यैकं जीवोत्सर्गो न चापरम् ॥ ३९१ ॥

राजा घृणी ब्राह्मणः सर्वभक्षः
स्त्री चावशा दुष्प्रकृतिः सहायः ।
प्रेष्यः प्रतीपोऽधिकृतः प्रमादी
त्याज्या इमे यश्च कृतं न वेत्ति ॥ ३९२ ॥
सत्याऽनृता च परुषा प्रियवादिनी च
हिंस्रा दयालुरपि चार्थपरा वदान्या ।
नित्यव्यया प्रचुररत्नधनागमा च
वाराङ्गनेव नृपनीतिरनेकरूपा ॥ ३९३ ॥

[टीका पु० पृ० १३८।१—१३८।३]

इति दमकेन संतोषितः पिङ्गलकः स्वां प्रकृतिमापन्नः सिंहासने समुपविष्टः ।

दमनकः प्रहृष्टमनाः 'विजयतां महाराजः । शुभमस्तु सर्वजगताम्' इत्युक्त्वा यथासुखमवस्थितः ॥

विष्णुशर्मोवाच—'सुहृद्भेदः श्रुतस्तावद्भवद्भिः ।'

राजपुत्रा ऊचुः—'भवत्प्रसादाच्छ्रुतः । सुखिनो भूता वयम् ।'

विष्णुशर्माऽब्रवीत्—'अपरमपीदमस्तु—

सुहृद्भेदस्तावद्भवतु भवतां शत्रुनिलये
खलः कालाकृष्टः प्रलयमुपसर्पत्वहरहः ।
जनो नित्यं भूयात्सकलसुखसंपत्तिवसतिः
कथारामे रम्ये सततमिह बालोऽपि रमताम् ॥३६४॥

इति हितोपदेशे सुहृद्भेदो नाम द्वितीयः कथासंग्रहः समाप्तः ।

———

[टीका पु० पृ० १३६।३—१३८।१]

विग्रहः ।

पुनः कथारम्भकाले राजपुत्रैरुक्तम्—'आर्य, राजपुत्रा वयम् । तद्विग्रहं श्रोतुं नः कुतूहलमस्ति ।'

विष्णुशर्मणोक्तम्—'यदेव भवद्भ्यो रोचते तत्कथयामि । विग्रहः श्रूयताम् । यस्यायमाद्यः श्लोकः—

हंसैः सह मयूराणां विग्रहे तुल्यविक्रमे ।
विश्वास्य वञ्चिता हंसाः काकैः स्थित्वाऽरिमन्दिरे ॥३९५॥'

राजपुत्रा ऊचुः—'कथमेतत् ।'

विष्णुशर्मा कथयति—

[१४ श हंस-मयूर विग्रह कथा]

'अस्ति कर्पूरद्वीपे पद्मकेलिनामधेयं सरः । तत्र हिरण्यगर्भो नाम राजहंसः प्रतिवसति । स च सर्वैर्जलचरपक्षिभिर्मिलित्वा पक्षिराज्येऽभिषिक्तः । यतः—

यदि न स्यान्नरपतिः सम्यङ् नेता ततः प्रजा ।
अकर्णधारा जलधौ विप्लवेतेह नौरिव ॥ ३९६ ॥
प्रजां संरक्षति नृपः सा वर्धयति पार्थिवम् ।
वर्धनाद्रक्षणं श्रेयस्तदभावे सदप्यसत् ॥३९७॥

एकदासौ राजहंसः सुविस्तीर्णकमलपर्यङ्के सुखासीनः परिवारपरिवृतस्तिष्ठति ।

ततः कुतश्चिद्देशादागत्य दीर्घमुखो नाम बकः प्रणम्योपविष्टः । राजोवाच—'दीर्घमुख, देशान्तरादागतोऽसि । वार्तां कथय ।'

स ब्रूते—'देव, अस्ति महती वार्ता । तामाख्यातुकाम एव सत्वरमागतोऽहम् । श्रूयताम्—

"अस्ति जम्बुद्वीपे विन्ध्यो नाम गिरिः । तत्र चित्रवर्णो नाम मयूरः पक्षिराजो निवसति ।

[टीका पु० पृ० १३८।१—१४०।१]

तस्यानुचरैश्चरद्भिः पक्षिभिरहं दग्धारण्यमध्ये चरन्नवलोकितः।

पृष्टश्च—'कस्त्वम्। कुतः समागतोऽसि।'

तदा मयोक्तम्—'कर्पूरद्वीपस्य राजचक्रवर्तिनो हिरण्यगर्भस्य राजहंसस्यानुचरोऽहम्। कौतुकाद्देशान्तरं द्रष्टुमागतोऽस्मि।'

एतच्छ्रुत्वा पक्षिभिरुक्तम्—'अनयोर्देशयोः को देशो भद्रतरो राजा च।'

मयोक्तम्—'आः किमेवमुच्यते। महदन्तरम्। यतः कर्पूरद्वीपः स्वर्ग एव, राजहंसश्च द्वितीयः स्वर्गपतिः। अत्र मरुस्थले पतिता यूयं किं कुरुथ। आगच्छतास्मद्देशे गम्यताम्।'

ततोऽस्मद्वचनमाकर्ण्य सर्वे सकोपा बभूवुः। तथा चोक्तम्—

पयःपानं भुजङ्गानां केवलं विषवर्धनम्।
उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये ॥३९८॥

विद्वानेवोपदेष्टव्यो नाविद्वांस्तु कदाचन।
वानरानुपदिश्याथ स्थानभ्रष्टा ययुः खगाः ॥३९९॥'

राजोवाच—'कथमेतत्।'

दीर्घमुखः कथयति—

[१५ श खग--वानर कथा--]

अस्ति नर्मदातीरे पर्वतोपत्यकायां विशालः शाल्मलीतरुः।

तत्र निर्मितनीडक्रोडे पक्षिणः सुखं वर्षास्वपि निवसन्ति।

अथैकदा वर्षासु नीलपटलैरिव जलधरपटलैरावृते नभस्तले धारासारैर्महती वृष्टिर्बभूव।

ततो वानरांस्तरुतलेऽवस्थितान् शीतार्तान् कम्पमानानवलोक्य कृपया पक्षिभिरुक्तम्—'भो भो वानराः शृणुत—

अस्माभिर्निर्मिता नीडाश्चञ्चुमात्राहृतैस्तृणैः।
हस्तपादादिसंयुक्ता यूयं किमिति सीदथ ॥४००॥'

तच्छ्रुत्वा वानरैर्जातामर्षैरालोचितम्—'अहो निर्वातनीडगर्भावस्थिताः सुखिनः पक्षिणोऽस्मान्निन्दन्ति। तद्भवतु तावद्वृष्टेरुपशमः। अनन्तरं शान्ते

[टीका पु० पृ० १४०।१—१४१।४]

पानीयवर्षैस्तैर्वानरैर्वृक्षमारुह्य सर्वे नीडा भग्नाः, तेषामण्डानि चाधः पातितानि।

अतोऽहं ब्रवीमि—'विद्वानेवोपदेष्टव्यः ३९९' इत्यादि॥

—:०:—

राजोवाच—'ततस्तैः किं कृतम्।'

बकः कथयति—'ततस्तैः पक्षिभिः कोपादुक्तम्—'केनासौ राजहंसः कृतो राजा।'

ततो मयोपजातकोपेनोक्तम्—'युष्मदीयो मयूरः केन राजा कृतः।'

एतच्छ्रुत्वा ते सर्वे मां हन्तुमुद्यताः।

ततो मयापि स्वविक्रमो दर्शितः।

राजा विहस्याह—

आत्मनश्च परेषां च यः समीक्ष्य बलाबलम्।
अन्तरं नैव जानाति स तिरस्क्रियतेऽरिभिः॥४०१॥
सुचिरं हि चरन्नित्यं क्षेत्रे सस्यमबुद्धिमान्।
द्वीपिचर्मपरिच्छन्नो वाग्दोषाद्गर्दभो हतः॥ ४०२॥

बकः पृच्छति—'कथमेतत्।'

राजा कथयति—

[१६ श द्वीपिचर्माच्छन्न गर्दभ कथा—]

"अस्ति हस्तिनापुरे विलासो नाम रजकः।

तस्य गर्दभोऽतिवाहनाद्दुर्बलो मुमूर्षुरिवाभवत्।

ततस्तेन रजकेनासौ व्याघ्रचर्मणा प्रच्छाद्यारण्यसमीपे सस्यक्षेत्रे नियुक्तः।

ततो दूरात्तमवलोक्य व्याघ्रबुद्ध्या क्षेत्रपतयः सत्वरं पलायन्ते।

अथैकदा केनापि सस्यरक्षकेण धूसरकम्बलकृततनुत्राणेन धनुष्काण्डं सज्जीकृत्यानतकायेनैकान्ते स्थितम्।

तं च दूराद्दृष्ट्वा गर्दभः पुष्टाङ्गो यथेष्टसस्यभक्षणजातबलो 'गर्दभीयम्' इति मत्वोच्चैः शब्दं कुर्वाणस्तदभिमुखं धावितः।

ततस्तेन सस्यरक्षकेण चीत्कारशब्दान्निश्चित्य 'गर्दभोऽयम्' इति लीलयैव व्यापादितः॥

अतोऽहं ब्रवीमि—'सुचिरं हि चरन्नित्यम् ४०२' इत्यादि॥

—:०:—

[टीका पु० पृ० १४१।४—१४३।२]

ततस्ततः—"

दीर्घमुखो ब्रूते—'ततः पक्षिभिरुक्तम्—'अरे पाप दुष्ट बक, अस्माकं भूमौ चरन्नस्माकं स्वामिनमधिक्षिपसि, तन्न क्षन्तव्यमिदानीम्।'

इत्युक्त्वा सर्वे मां चञ्चुभिर्हत्वा सकोपा ऊचुः—'पश्य रे मूर्ख, स हंसस्तव राजा सर्वथा मृदुः। तस्य राज्येऽधिकार एव नास्ति। यत एकान्ततो मृदुः करतलगतमप्यर्थं रक्षितुमक्षमः। कथं स पृथिवीं शास्ति, राज्यं वा तस्य किम्। त्वं च कूपमण्डूकः, तेन तदाश्रयमुपदिशसि। शृणु—

सेवितव्यो महावृक्षः फलच्छायासमन्वितः।
यदि दैवात्फलं नास्ति छाया केन निवार्यते ॥४०३॥

हीनसेवा न कर्तव्या कर्तव्यो महदाश्रयः।
पयोऽपि शौण्डिकीहस्ते वारुणीत्यभिधीयते ॥४०४॥

महानप्यल्पतां याति निर्गुणे गुणविस्तरः।
आधाराधेयभावेन गजेन्द्र इव दर्पणे ॥४०५॥

व्यपदेशेऽपि सिद्धिः स्यादतिशक्ते नराधिपे।
शशिनो व्यपदेशेन शशकाः सुखमासते ॥४०६॥'

मयोक्तम्—'कथमेतत्।'

पक्षिणः कथयन्ति—

[१७ श शशक गजयूथ कथा—]

'कदाचिद्वर्षास्वपि वृष्टेरभावात्तृषार्तो **गजयूथो** यूथपतिमाह—'नाथ, कोऽभ्युपायोऽस्माकं जीवनाय। अस्त्यत्र क्षुद्रजन्तूनां निमज्जनस्थानम्। वयं तु निमज्जनाभावादन्धा इव। क्व यायाम, किं कुर्याम।

ततो **हस्तिराजो** नातिदूरं गत्वा निर्मलं ह्रदं दर्शितवान्।

ततो दिनेषु गच्छत्सु तत्तीरावस्थिता गजपादाहतिभिश्चूर्णिताः क्षुद्रशशकाः।

[टीका पु० पृ० १४३।३--१४५।३]

अनन्तरं शिलीमुखो नाम शशकश्चिन्तयामास—'अनेन गजयूथेन पिपासाकुलितेन प्रत्यहमत्रागन्तव्यम्। अतो विनश्यत्यस्मत्कुलम्।'

ततो विजयो नाम वृद्धशशकोऽवदत्—'मा विषीदत। मयात्र प्रतीकारः कर्त्तव्यः।'

ततोऽसौ प्रतिज्ञाय चलितः। गच्छता च तेनालोचितम्—'कथं मया गजयूथसमीपे स्थित्वा वक्तव्यम्। यतः—

स्पृशन्नपि गजो हन्ति जिघ्रन्नपि भुजङ्गमः।
हसन्नपि नृपो हन्ति, मानयन्नपि दुर्जनः ॥४०७॥

अतोऽहं पर्वतशिखरमारुह्य यूथनाथं संवादयानि।'

तथानुष्ठिते यूथनाथ उवाच—'कस्त्वम्, कुतः समायातः।'

स ब्रूते—'शशकोऽहम्। भगवता चन्द्रेण भवदन्तिकं प्रेषितः।'

यूथपतिराह—'कार्यमुच्यताम्।'

विजयो ब्रूते—

'उद्यतेष्वपि शस्त्रेषु दूतो वदति नान्यथा।
सदैवावध्यभावेन यथार्थस्य हि वाचकः ॥४०८॥

तदहं तदाज्ञया ब्रवीमि। शृणु—यदेते चन्द्रसरोरक्षकाः शशकास्त्वया निःसारिताः, तन्न युक्तं कृतम्। यतस्ते शशकाश्चिरमस्माकं रक्षिताः। अत एव मे "शशाङ्क" इति प्रसिद्धिः।'

एवमुक्तवति दूते यूथपतिर्भयादिदमाह—'इदमज्ञानतः कृतम्। पुनर्न गमिष्यामि।'

दूत उवाच—'यद्येवं तदत्र सरसि कोपात्कम्पमानं भगवन्तं शशाङ्कं प्रणम्य प्रसाद्य गच्छ।'

ततो रात्रौ यूथपतिं नीत्वा जले चञ्चलं चन्द्रबिम्बं दर्शयित्वा यूथपतिः प्रणामं कारितः। उक्तं च तेन—'देव, अज्ञानादनेनापराधः कृतः। ततः क्षम्यताम्। नैवं वारान्तरं विधास्यते।' इत्युक्त्वा प्रस्थापितः॥

अतोऽहं ब्रवीमि—'व्यपदेशेऽपि सिद्धिः स्यात्' ४०६ इति॥

—:o:—

ततो मयोक्तम्—'स एवास्मत्प्रभू राजहंसो महाप्रतापोऽतिसमर्थः। त्रैलोक्यस्यापि प्रभुत्वं तत्र युज्यते, किं पुना राज्यम्' इति।

[टीका पु० पृ० १४५।३—१४८।२]

तदाहं तैः पक्षिभिः 'दुष्ट, कथमस्मद्भूमौ चरसि' इत्यभिधाय राज्ञश्चित्रवर्णस्य समीपं नीतः।

ततो राज्ञः पुरो मां प्रदर्श्य तैः प्रणम्योक्तम्—'देव, अवधीयतामेष दुष्टो बको यदस्मद्देशे चरन्नपि देवपादानधिक्षिपति।'

राजाह—'कोऽयम्। कुतः समायातः।'

त ऊचुः—हिरण्यगर्भनाम्नो राजहंसस्यानुचरः कर्पूरद्वीपादागतः।'

अथाहं गृध्रेण मन्त्रिणा पृष्टः—'कस्तत्र मुख्यो मन्त्री' इति।

मयोक्तम्—'सर्वशास्त्रार्थपारगः सर्वज्ञो नाम चक्रवाकः।'

गृध्रो ब्रूते—'युज्यते। स्वदेशजोऽसौ। यतः—

स्वदेशजं कुलाचारं विशुद्धमुपधाशुचिम्।
मन्त्रज्ञमव्यसनिनं व्यभिचारविवर्जितम् ॥४०९॥
अधीतव्यवहाराङ्गं मौलं ख्यातं विपश्चितम्।
अर्थस्योत्पादकं सम्यग्विदध्यान्मन्त्रिणं नृपः ॥४१०॥'

अत्रान्तरे शुकेनोक्तम्—'देव, कर्पूरद्वीपादयो लघुद्वीपा जम्बुद्वीपान्तर्गता एव। तत्रापि देवपादानामेवाधिपत्यम्।'

ततो राज्ञाप्युक्तम्—'एवमेव। यतः—

राजाऽमत्तः शिशुश्चैव प्रमदो धनगर्वितः।
अप्राप्यमपि वाञ्छन्ति किं पुनर्लभ्यमेव यत् ॥४११॥'

ततो मयोक्तम्—'यदि वचनमात्रेणैवाधिपत्यं सिद्ध्यति तदा जम्बुद्वीपेऽप्यस्मत्प्रभोर्हिरण्यगर्भस्य स्वाम्यमस्ति।'

शुक उवाच—'कथमत्र निर्णयः।'

मयोक्तम्—संग्राम एव।'

राज्ञा विहस्योक्तम्—'स्वस्वामिनं गत्वा सज्जीकुरु।'

तदा मयोक्तम्—'स्वदूतोऽपि प्रस्थाप्यताम्।'

राजोवाच—'कः प्रयातु दौत्येन। यत एवंभूतो दूतः कार्यः—

भक्तो गुणी शुचिर्दक्षः प्रगल्भोऽव्यसनी क्षमी।
ब्राह्मणः परमर्मज्ञो दूतः स्यात्प्रतिभानवान् ॥४१२॥'

[टीका पु० पृ० १४८।२—१५०।१]

गृध्रो वदति—'सन्त्येव दूता बहवः। किन्तु ब्राह्मण एव कर्तव्यः। यतः—

प्रसादं कुरुते पत्युः संपत्तिं नाभिवाञ्छति।
कालिमा कालकूटस्य नापैतीश्वरसङ्गमात् ॥४१३॥'

राजाह—'ततः शुक एव व्रजतु।' 'शुक, त्वमेवानेन सह गत्वास्मदभिलषितं ब्रूहि।'

शुको ब्रूते—'यथाज्ञापयति देवः। किं त्वयं दुर्जनो बकः। तदनेन सह न गच्छामि। तथा चोक्तम्—

खलः करोति दुर्वृत्तं नूनं फलति साधुषु।
दशाननो हरेत्सीतां बन्धनं स्यान्महोदधेः ॥४१४॥

अपरं च—

न स्थातव्यं न गन्तव्यं दुर्जनेन समं क्वचित्।
काकसङ्गाद्धतो हंसस्तिष्ठन् गच्छंश्च वर्तकः ॥४१५॥'

राजोवाच 'कथमेतत्।'

शुकः कथयति—

[१८ श काकसङ्गेन हंसमरण कथा—]

'अस्त्युज्जयिनीवर्त्मनि प्रान्तरे महान् पिप्पलीवृक्षः।

तत्र हंसकाकौ निवसतः।

कदाचिद्ग्रीष्मसमये परिश्रान्तः कश्चित्पथिकस्तत्र तरुतले धनुष्काण्डं संनिधाय सुप्तः।

क्षणान्तरे तन्मुखाद्वृक्षच्छायापगता।

ततः सूर्यतेजसा तन्मुखं व्याप्तमवलोक्य कृपया तद्वृक्षस्थितेन हंसेन पक्षौ प्रसार्य पुनस्तन्मुखे छाया कृता।

ततो निर्भरनिद्रासुखिना तेनाध्वन्येन मुखव्यादानं कृतम्।

अथ परसुखमसहिष्णुः स्वभावदौर्जन्येन स काकस्तस्य मुखे पुरीषोत्सर्गं कृत्वा पलायितः।

ततो यावदसौ पान्थ उत्थायोर्ध्वं निरीक्षते, तावत्तेनावलोकितो हंसः; काण्डेन हत्वा व्यापादितः॥'

[टीका पु० पृ० १५०।१—१५।३]

अतोहं ब्रवीमि—न स्थातव्यं न गन्तव्यं दुर्जनेन समं क्वचित्' ४१५ इति ॥

[वर्तक मरण कथा—]

वर्तककथामपि कथयामि—

एकदा सर्वे पक्षिणो भगवतो गरुडस्य यात्राप्रसङ्गेन समुद्रतीरं प्रचलिताः ।

तत्र काकेन सह वर्तकश्चलितः ।

अथ गच्छतो गोपालस्य मस्तकस्थितभाण्डाद्दधि वारंवारं तेन काकेन खाद्यते ।

ततो यावदसौ दधिभाण्डं भूमौ निधायोर्ध्वमवलोकते तावत्तेन काकवर्तकौ दृष्टौ ।

ततस्तेन खेदितः काकः पलायितः । वर्तको मन्दगतिस्तेन प्राप्तो व्यापादितः ।

अतोऽहं ब्रवीमि—'न स्थातव्यं न गन्तव्यम् ४१५ इत्यादि ॥

—:o:—

ततो मयोक्तम्—'भ्रातः शुक, किमेवं ब्रवीषि । मां प्रति यथा श्रीमद्देवपादास्तथा भवानपि ।'

शुकेनोक्तम्—'अस्त्वेवम् । किंतु,

दुर्जनैरुच्यमानानि संस्मितानि प्रियाण्यपि ।
अकालकुसुमानीव भयं संजनयन्ति हि ॥ ४१६ ॥

दुर्जनत्वं च भवतो वाक्यादेव ज्ञातं यदनयोर्भूपालयोर्विग्रहे भवद्वचनमेव निदानम् ।'

ततोऽहं तेन राज्ञा यथाव्यवहारं संपूज्य प्रस्थापितः ।

शुकोऽपि मम पश्चादागच्छन्नस्ति । एतत्सर्वं परिज्ञाय यथाकर्तव्यमनुसंधीयताम् ।' इति ॥

चक्रवाको—विहस्याह—'देव, बकेन तावद्देशान्तरमपि गत्वा यथाशक्ति राजकार्यमनुष्ठितम् । किंतु देव, स्वभाव एष मूर्खाणाम् । यतः—

शतं दद्यान्न विवदेदिति विज्ञस्य संमतम् ।
विना हेतुमपि द्वन्द्वमेतन्मूर्खस्य लक्षणम् ॥ ४१७ ॥'

राजाह—'किमतीतोपालम्भनेन । प्रस्तुतमनुसंधीयताम् ।'

[टीका पु० पृ० १५१।३—१५३।३]

चक्रवाको ब्रूते 'देव, विजने ब्रवीमि। यतः—

वर्णाकारप्रतिध्वानैर्नेत्रवक्त्रविकारतः।
अभ्यूहन्ति मनो धीरास्तस्माद्रहसि मन्त्रयेत् ॥ ४१८ ॥

राजा मन्त्री च तत्र स्थितौ। अन्येऽन्यत्र गताः ॥

चक्रवाको ब्रूते—'देव, अहमेवं जानामि—'कस्याप्यस्मन्नियोगिनः प्रेरणया बकेनेदमनुष्ठितम्। यतः—

वैद्यानामातुरः श्रेयान्व्यसनीशो नियोगिनाम्।
विदुषां जीवनं मूर्खः सद्वन्द्वो नृपतेर्जनः ॥४१९॥,

राजाब्रवीत्—'भवतु। कारणमत्र पश्चान्निरूपणीयम्। संप्रति यत्कर्तव्यं तन्निरूप्यताम्।'

चक्रवाको ब्रूते—'देव, प्रणिधिस्तावत्तत्र यातु। ततस्तदनुष्ठानं बलाबलं च जानीमः। तथा हि—

भवेत्स्वपरराष्ट्राणां कार्याकार्यावलोकने।
चारश्चक्षुर्महीभर्तुर्यस्य नास्त्यन्ध एव सः ॥ ४२० ॥

स च द्वितीयं विश्वासपात्रं गृहीत्वा यातु। तेनासौ स्वयं तत्रावस्थाय द्वितीयं तत्रत्यमन्त्रकार्यं सुनिभृतं निश्चित्य निगद्य प्रस्थापयति। तथा चोक्तम्—

तीर्थाश्रमसुरस्थाने शास्त्रविज्ञानहेतुना।
तपस्विव्यञ्जनोपेतैः स्वचरैः सह संवदेत् ॥ ४२१ ॥

गूढचारश्च यो जले स्थले च चरति। ततोऽसावेव बको नियुज्यताम्। एतादृश एव कश्चिद्बको द्वितीयत्वेन प्रयातु। तद्गृहलोकाश्च राजद्वारे तिष्ठन्तु। किन्तु देव, एतदपि सुगुप्तमनुष्ठातव्यम्। यतः—

षट्कर्णो भिद्यते मन्त्रस्तथा प्राप्तश्च वार्तया।
इत्यात्मना द्वितीयेन मन्त्रः कार्यो महीभृता ॥ ४२२ ॥

मन्त्रभेदे हि ये दोषा भवन्ति पृथिवीपतेः।
न शक्यास्ते समाधातुमिति नीतिविदां मतम् ॥ ४२३ ॥

[टीका पु० पृ० १५३।३--१५५।३]

राजा विमृश्योवाच—'प्राप्तस्तावन्मयोक्तमः प्रणिधिः ।'

मन्त्री ब्रूते—'तदा संग्रामविजयोऽपि प्राप्तः ।'

अत्रान्तरे प्रतीहारः प्रविश्य प्रणम्योवाच—'देव, जम्बुद्वीपादागतो द्वारि शुकस्तिष्ठति ।'

राजा चक्रवाकमालोकते ।

चक्रवाकेणोक्तम्—'कृतावासे तावद्गत्वा भवतु । पश्चाद् द्रष्टव्यः ।'

प्रतीहारस्तमावासस्थानं नीत्वा गतः ।

राजाह—'विग्रहस्तावदुपस्थितः ।'

चक्रवाको ब्रूते—देव, तथापि सहसा विग्रहो न विधिः । यतः—

सचिवः किं स मन्त्री वा य आदावेव भूपतिम् ।
युद्धोद्योगं स्वभूत्यागं निर्दिशत्यविचारितम् ॥ ४२४ ॥
विजेतुं प्रयतेतारीन्न युद्धेन कदाचन ।
अनित्यो विजयो यस्माद्दृश्यते युध्यमानयोः ॥ ४२५ ॥
साम्ना दानेन भेदेन समस्तैरथवा पृथक् ।
साधितुं प्रयतेतारीन्न युद्धेन कदाचन ॥ ४२६ ॥
सर्व एव जनः शूरो ह्यनासादितविग्रहः ।
अदृष्टपरसामर्थ्यः सदर्पः को भवेन्न हि ॥ ४२७ ॥
न तथोत्थाप्यते ग्रावा प्राणिभिर्दारुणा यथा ।
अल्पोपायान्महासिद्धिरेतन्मन्त्रफलं महत् ॥ ४२८ ॥

किंतु विग्रहमुपस्थितं विलोक्य व्यवह्रियताम् । यतः—

यथाकालं कृता यत्नात्कृषिः फलवती भवेत् ।
तद्वन्नीतिरियं देव चिरात्फलति न क्षणात् ॥ ४२९ ॥
महतो दूरभीरुत्वमासन्ने शूरता गुणः ।
विपत्तौ च महांल्लोके धीरतामनुगच्छति ॥४३०॥

[टीका पु० पृ० १५५।३—१५७।३]

प्रत्यूहः सर्वसिद्धीनामुत्तापः प्रथमः किल ।
अतिशीतलमप्यम्भः किं भिनत्ति न भूभृतः ॥ ४३१ ॥

विशेषतश्च देव, महाबलोऽसौ चित्रवर्णो राजा । अतः—

बलिना सह योद्धव्यमिति नास्ति निदर्शनम् ।
तद्युद्धं हस्तिना सार्धं नराणां मृत्युमावहेत् ॥ ४३२ ॥
स मूर्खः कालमप्राप्य योऽपकर्तरि वर्तते ।
कलिर्बलवता सार्धं कीटपक्षोद्गमो यथा ॥ ४३३ ॥
कौर्मं संकोचमास्थाय प्रहारमपि मर्षयेत् ।
प्राप्ते काले तु नीतिज्ञ उत्तिष्ठेत्क्रूरसर्पवत् ॥ ४३४ ॥

शृणु देव—

महत्यल्पेऽप्युपायज्ञः सममेव भवेत्क्षमः ।
समुन्मूलयितुं वृक्षांस्तृणानीव नदीरयः ॥ ४३५ ॥

अतस्तद्दूतोऽयं शुकोऽत्राश्वास्य तावद्ध्रियतां यावद्दुर्गं सज्जीक्रियते । यतः—

एकः शतं योधयति प्राकारस्थो धनुर्धरः ।
शतं शतसहस्राणि तस्माद्दुर्गं विधीयते ॥ ४३६ ॥
अदुर्गो विषयः कस्य नारेः परिभवास्पदम् ।
अदुर्गोऽनाश्रयो राजा पोतच्युतमनुष्यवत् ॥ ४३७ ॥
दुर्गं कुर्यान्महाखातमुच्चप्राकारसंयुतम् ।
सयन्त्रार्थं जलं शैलसरिन्मरुवनाश्रयम् ॥ ४३८ ॥
विस्तीर्णतातिवैषम्यं रसधान्येध्मसंग्रहः ।
प्रवेशश्चापसारश्च सप्तैता दुर्गसंपदः ॥ ४३९ ॥

राजाह—'दुर्गानुसंधाने को नियुज्यताम् ।'

चक्रो ब्रूते—

'यो यत्र कुशलः कार्ये तं तत्र विनियोजयेत् ।
कर्मस्वदृष्टकर्मा यः शास्त्रज्ञोऽपि विमुह्यति ॥ ४४० ॥

[टीका पु० पृ० १५७।३—१५६।२]

तदाहूयतां सारसः।

तथानुष्ठिते सत्यागतं सारसमालोक्य राजोवाच—'भोः सारस, त्वं सत्वरं दुर्गमनुसंधेहि।'

सारसः प्रणम्योवाच—'देव, दुर्गं तावदिदमेव चिरात्सुनिरूपितमास्ते महत्सरः। किं त्वत्र मध्यवर्तिद्वीपे द्रव्यसंग्रहः कार्यताम्। यतः—

धान्यानां संग्रहो राजन्नुत्तमः सर्वसंग्रहात्।
निक्षिप्तं हि मुखे रत्नं न कुर्यात्प्राणधारणम् ॥४४१॥
ख्यातः सर्वरसानां हि लवणो रस उत्तमः।
गृहीतं च विना तेन व्यञ्जनं गोमयायते ॥४४२॥'

राजाह—'सत्वरं गत्वा सर्वमनुतिष्ठ।'

पुनः प्रविश्य प्रतीहारो ब्रूते—'देव, सिंहलद्वीपादागतो मेघवर्णो नाम वायसः सपरिवारो द्वारि तिष्ठति। देवपादं द्रष्टुमिच्छति।'

राजाह—'काकः पुनः सर्वज्ञो बहुद्रष्टा च भवति। तद्भवति संग्राह्यः।'

चक्रो ब्रूते—'देव, अस्त्येवम्। किंतु काकः स्थलचरः। तेनास्मद्विपक्षनियुक्तः कथं संग्राह्यः। तथा चोक्तम्—

आत्मपक्षं परित्यज्य परपक्षेषु यो रतः।
स परैर्हन्यते मूढो नीलवर्णशृगालवत् ॥४४३॥'

राजोवाच—'कथमेतत्।'

मन्त्री कथयति—

[२० घ—नीलवर्णशृगालकथा—]

"अस्त्यरण्ये कश्चिच्छृगालः स्वेच्छया नगरोपान्ते भ्राम्यन्नीलीभाण्डे पतितः। पश्चात्तत उत्थातुमसमर्थः प्रातरात्मानं मृतवत्संदर्श्य स्थितः। अथ नीलीभाण्डस्वामिना मृतः इति ज्ञात्वा तस्मात्समुत्थाप्य दूरे नीत्वा धृतः, तस्मात्पलायितः।

ततोऽसौ वनं गत्वा स्वकीयमात्मानं नीलवर्णमवलोक्याचिन्तयत्—'अहमिदानीमुत्तमवर्णः। तदहं स्वकीयोत्कर्षं किं न साधयामि।'

[टीका पु० पृ० १५६।२—१६१।२]

इत्यालोच्य शृगालानाहूय तेनोक्तम्—'अहं भगवत्या वनदेवतया स्वहस्तेनारण्यराज्ये सर्वौषधिरसेनाभिषिक्तः। तदद्यारभ्यारण्येऽस्मदाज्ञया व्यवहारः कार्यः।'

शृगालाश्च तं विशिष्टवर्णमवलोक्य साष्टाङ्गपातं प्रणम्योचुः—'यथाज्ञापयति देवः।'

अनेनैव क्रमेण सर्वेष्वरण्यवासिष्वाधिपत्यं तस्य बभूव।

ततस्तेन स्वज्ञातिभिरावृतेनाधिक्यं साधितम्। ततस्तेन व्याघ्रसिंहादीनुत्तमपरिजनान् प्राप्य सदसि शृगालानवलोक्य लज्जमानेनावज्ञाय दूरीकृताः स्वज्ञातयः।

ततो विषण्णान् शृगालानवलोक्य केनचिद्वृद्धशृगालेनैतत्प्रतिज्ञातम्—'मा विषीदत। यदनेनानभिज्ञेन नीतिविदो मर्मज्ञा वयं (स्वसमीपात्?) दूरी कृताः, तद्यथायं नश्यति तथा विधेयम्।, यतोऽमी व्याघ्रादयो वर्णमात्रविप्रलब्धाः शृगालमज्ञात्वा राजानमिमं मन्यन्ते। तद्यथायं परिचितो भवति तथा कुरुत। तत्र चैवमनुष्ठेयम्। यत्सर्वे संध्यासमये तत्संनिधाने महारावमेकदैव करिष्यथ। ततस्तं शब्दमाकर्ण्य जातिस्वभावात्तेनापि शब्दः कर्तव्यः। यतः—

यः स्वभावो हि यस्यास्ति स नित्यं दुरतिक्रमः।
श्वा यदि क्रियते राजा तत्किं नाश्नात्युपानहम् ॥४४४॥

ततः शब्दादभिज्ञाय स व्याघ्रेण हन्तव्यः।'

ततस्तथानुष्ठिते सति तद्वृत्तम्। तथा चोक्तम्—

छिद्रं मर्म च वीर्यं च सर्वं वेत्ति निजो रिपुः।
दहत्यन्तर्गतश्चैव शुष्कं वृक्षमिवानलः ॥४४५॥

अतोऽहं ब्रवीमि—आत्मपक्षं परित्यज्य ४४३॥' इत्यादि॥

—:०:—

राजाह—'यद्येवं तथापि दृश्यतां तावदयं दूरादागतः। तत्संग्रहे विचारः कार्यः।'

चक्रो ब्रूते—'देव, प्रणिधिः प्रहितो दुर्गश्च सज्जीकृतः। अतः शुकोऽप्यालोक्य प्रस्थाप्यताम्।

नन्दं जघान चाणक्यस्तीक्ष्णदूतप्रयोगतः।
तच्छूरान्तरितं दूतं पश्येद्धीरसमन्वितः ॥४४६॥

[टीका पु० पृ० १६१।२—१६३।२]

ततः सभां कृत्वाहूतः शुकः काकश्च ॥

शुकः किञ्चिदुन्नतशिरा दत्तासन उपविश्य ब्रूते—'भो हिरण्यगर्भ, त्वां महाराजाधिराजः श्रीमांश्चित्रवर्णः समाज्ञापयति—'यदि जीवितेन श्रिया वा प्रयोजनमस्ति तदा सत्वरमागत्यास्मच्चरणौ प्रणम। नोचेदवस्थातुं स्थानान्तरं चिन्तय।'

राजा सकोपमाह—'आः सभायां कोऽप्यस्माकं नास्ति य एनं गलहस्तयति।

उत्थाय मेघवर्णो ब्रूते—'देव, आज्ञापय। हन्मि दुष्टं शुकम्।'

सर्वज्ञो राजानं काकं च सन्त्वयन् ब्रूते—'शृणु तावत्—

न सा सभा यत्र न सन्ति वृद्धा
वृद्धा न ते ये न वदन्ति धर्मम्।
धर्मः स नो यत्र न सत्यमस्ति
सत्यं न तद्यच्छलमभ्युपैति ॥४४७॥

यतो धर्मश्चैषः—

दूतो म्लेच्छोऽप्यवध्यः स्याद्राजा दूतमुखो यतः।
उद्यतेष्वपि शस्त्रेषु नृपते किं पुनर्द्विजः ॥४४८॥
स्वापकर्षं परोत्कर्षं दूतोक्तैर्मन्यते तु कः।
सदैवावध्यभावेन दूतः सर्वं हि जल्पति ॥४४९॥'

ततो राजा काकश्च स्वां प्रकृतिमापन्नौ।

शुकोऽप्युत्थाय चलितः।

पश्चाच्चक्रवाकेणानीय प्रबोध्य कनकालङ्कारादिकं दत्त्वा संप्रेषितो ययौ।

शुकोऽपि विन्ध्याचलं गत्वा राजानं प्रणतवान्।

तमालोक्य चित्रवर्णो राजाह—'शुक, का वार्ता। कीदृशोऽसौ देशः।'

शुको ब्रूते—'देव, संक्षेपादियं वार्ता। संप्रति युद्धोद्योगः क्रियताम्।

देशश्चासौ कर्पूरद्वीपः स्वर्गैकदेशः कथं वर्णयितुं शक्यते।'

ततः सर्वान् शिष्टानाहूय राजा मन्त्रयितुमुपविष्टः। आह च—'संप्रति

[टीका पु० पृ० १६३।२—१६५।१]

कर्तव्ये विग्रहे यथाकर्तव्यमुपदेश ब्रूत । विग्रहः पुनरवश्यं कर्तव्यः । तथा चोक्तम्—

असंतुष्टा द्विजा नष्टाः संतुष्टाश्च महीभुजः ।
सलज्जा गणिका नष्टा निर्लज्जाश्च कुलस्त्रियः ॥४५०॥'

दूरदर्शी नाम गृध्रो ब्रूते—'देव, व्यसनितया विग्रहो न विधिः । यतः—

मित्रामात्यसुहृद्वर्गा यदा स्युर्दृढभक्तयः ।
शत्रूणां विपरीताश्च कर्तव्यो विग्रहस्तदा ॥४५१॥
भूमिर्मित्रं हिरण्यं च विग्रहस्य फलं त्रयम् ।
यदैतन्निश्चितं भावि कर्तव्यो विग्रहस्तदा ॥४५२॥'

राजाह—मम बलानि तावदवलोकयतु मन्त्री । तदेतेषामुपयोगो ज्ञायताम् । एवमाहूयतां मौहूर्तिकः । निर्णीय शुभलग्नं यात्रार्थं ददातु ।'

मन्त्री ब्रूते—'तथापि सहसा यात्राकरणमनुचितम् । यतः—

विशन्ति सहसा मूढा येऽविचार्य द्विषद्बलम् ।
खड्गधारापरिष्वङ्गं लभन्ते ते सुनिश्चितम् ॥४५३॥

राजाह—'मन्त्रिन्, ममोत्साहभङ्गं सर्वथा मा कृथाः । विजिगीषुर्यथा परभूमिमाक्रामति तथा कथय ।'

गृध्रो ब्रूते—'तत्कथयामि । किंतु तदनुष्ठितमेव फलप्रदम् । तथा चोक्तम्—

किं मन्त्रेणाननुष्ठाने शास्त्रवत्पृथिवीपतेः ।
न ह्यौषधपरिज्ञानाद्व्याधेः शान्तिः क्वचिद्भवेत् ॥४५४॥

राजादेशश्चानतिक्रमणीय इति यथाश्रुतं निवेदयामि । शृणु—

नद्यद्रिवनदुर्गेषु यत्र यत्र भयं नृप ।
तत्र तत्र च सेनानीर्यायाद्व्यूहीकृतैर्बलैः ॥४५५॥
बलाध्यक्षः पुरो यायात्प्रवीरपुरुषान्वितः ।
मध्ये कलत्रं स्वामी च कोषः फल्गु च यद्बलम् ॥४५६॥

[टीका पु० पृ० १६५।१—१६७।२]

पार्श्वयोरुभयोरश्वा अश्वानां पार्श्वतो रथाः ।
रथानां पार्श्वयोर्नागा नागानां च पदातयः ॥४५७॥
पश्चात्सेनापतिर्यायात्खिन्नानाश्वासयञ्छनैः ।
मन्त्रिभिः सुभटैर्युक्तः प्रतिगृह्य बलं नृप ॥४५८॥
स यायाद्विषमं नागैर्जलाढ्यं समहीधरम् ।
सममश्वैर्जलं नौभिः सर्वत्रैव पदातिभिः ॥४५९॥
हस्तिनां गमनं प्रोक्तं प्रशस्तं जलदागमे ।
तदन्यत्र तुरङ्गाणां पत्तीनां सर्वदैव हि ॥४६०॥
शैलेषु दुर्गमार्गेषु विधेयं नृपरक्षणम् ।
सुयोधै रक्षितस्यापि शयनं योगनिद्रया ॥४६१॥
नाशयेत्कर्षयेच्छत्रून् दुर्गकण्टकमर्दनैः ।
परदेशप्रवेशे च कुर्यादाटविकान्पुरः ॥४६२॥
यत्र राजा तत्र कोषो विना कोषान्न राजता ।
स्वभृत्येभ्यस्ततो दद्यात्को हि दातुर्न युध्यते ॥४६३॥
न नरस्य नरो दासो दासस्त्वर्थस्य भूपते ।
गौरवं लाघवं वापि धनाधननिबन्धनम् ॥४६४॥
अभेदेन च युध्येरन् रक्षेयुश्च परस्परम् ।
फल्गु सैन्यं च यत्किञ्चिन्मध्ये व्यूहस्य कारयेत् ॥४६५॥
पदातींश्च महीपालः पुरोऽनीकस्य योजयेत् ।
उपरुध्यारिमासीत राष्ट्रं चास्योपपीडयेत् ॥४६६॥
स्यन्दनाश्वैः समे युध्येदनूपे नौद्विपैस्तथा ।
वृक्षगुल्मावृते चापैरसिचर्मायुधैः स्थले ॥४६७॥
दूषयेच्चास्य सततं यवसान्नोदकेन्धनम् ।
भिन्द्याच्चैव तडागानि प्राकारान्परिखास्तथा ॥४६८॥
बलेषु प्रमुखो हस्ती न तथान्यो महीपतेः ।
निजैरवयवैरेव मातङ्गोऽष्टायुधः स्मृतः ॥४६९॥
बलमश्वश्च सैन्यानां प्राकारो जङ्गमो यतः ।
तस्मादश्वाधिको राजा विजयी स्थलविग्रहे ॥४७०॥

[टीका पु० पृ० १६७।२—१६६।३]

तथा चोक्तम्—

युध्यमाना हयारूढा देवानामपि दुर्जयाः ।
अपि दूरस्थितास्तेषां वैरिणो हस्तवर्तिनः ॥४७१॥
प्रथमं युद्धकारित्वं समस्तबलपालनम् ।
दिङ्मार्गाणां विशोधित्वं पत्तिकर्म प्रचक्षते ॥४७२॥
स्वभावशूरमस्त्रज्ञमविरक्तं जितश्रमम् ।
प्रसिद्धक्षत्रियप्रायं बलं श्रेष्ठतमं विदुः ॥४७३॥
यथा प्रभुकृतान्मानाद्युध्यन्ते भुवि मानवाः ।
न तथा बहुभिर्दत्तैर्द्रविणैरपि भूपते ॥४७४॥
वरमल्पबलं सारं न कुर्यान्मुण्डमण्डलीम् ।
कुर्यादसारभङ्गो हि सारभङ्गमपि स्फुटम् ॥४७५॥
अप्रसादोऽनधिष्ठानं देयांशहरणं च यत् ।
कालयापोऽप्रतीकारस्तद्वैराग्यस्य कारणम् ॥४७६॥
अपीडयन्बलं शत्रूञ्जिगीषुरभिषेणयेत् ।
सुखसाध्यं द्विषां सैन्यं दीर्घयानप्रपीडितम् ॥४७७॥
दायादादपरो मन्त्रो नास्ति भेदकरो द्विषाम् ।
तस्मादुत्थापयेद्यत्नाद्दायादं तस्य विद्विषः ॥४७८॥
संधाय युवराजेन यदि वा मुख्यमन्त्रिणा ।
अन्तःप्रकोपनं कार्यमभियोक्तुः स्थिरात्मनः ॥४७९॥
क्रूरं मित्रं रणे चापि भङ्गं दत्त्वाभिघातयेत् ।
अथवा गोग्रहाकृष्ट्या तन्मुख्याश्रितबन्धनात् ॥४८०॥
स्वराज्यं वासयेद्राजा परदेशापवाहनात् ।
अथवा दानमानाभ्यां वासितं धनदं हि तत् ॥४८१॥

राजाह—'आः, किं बहुनोदितेन ।

आत्मोदयः परज्यानिर्द्वयं नीतिरितीयती ।
तदूरीकृत्य कृतिभिर्वाचस्पत्यं प्रतायते ॥४८२॥

मन्त्रिणा विहस्योक्तम्—सर्वं सत्यमेतत् । किंतु—

अन्यदुच्छृङ्खलं सत्त्वमन्यच्छास्त्रनियन्त्रितम् ।
सामानाधिकरण्यं हि तेजस्तिमिरयोः कुतः ॥४८३॥

[टीका पु० पृ० १६६।३—१७१।२]

ततं उत्थाय राजा मौहूर्तिकावेदितलग्ने प्रस्थितः।

अथ प्रणिधिप्रहितश्चरो हिरण्यगर्भसमीपमागत्योवाच—'देव, समागतप्रायो राजा चित्रवर्णः। संप्रति मलयपर्वताधित्यकायां समावासितकटको वर्त्तते। दुर्गशोधनं प्रतिक्षणमनुसंधातव्यम्। यतोऽसौ गृध्रो महामन्त्री। किंच केनचित्सह तस्य विश्वासकथाप्रसङ्गेनैव तदिङ्गितमवगतं मया 'यदनेन कोऽप्यस्मद्दुर्गे प्रागेव नियुक्तः।'

चक्रो ब्रूते—'देव, काक एवासौ संभवति।'

राजाह—'न कदाचिदेतत्। यद्येवं तदा कथं तेन शुकस्याभिभवायोद्योगः कृतः। अपरं च—शुकस्यागमनात्तस्य विग्रहोत्साहः। स चिरादत्रास्ते।'

मन्त्री ब्रूते—'तथाप्यागन्तुः शङ्कनीयः।'

राजाह—'आगन्तुका अपि कदाचिदुपकारका दृश्यन्ते। शृणु—

परोऽपि हितवान्बन्धुर्बन्धुरप्यहितः परः।
अहितो देहजो व्याधिर्हितमारण्यमौषधम् ॥४८४॥
आसीद्वीरवरो नाम शूद्रकस्य महीभृतः।
सेवकः स्वल्पकालेन स ददौ सुतमात्मनः ॥४८५॥'

चक्रः पृच्छति—'कथमेतत्।'

राजा कथयति—

[२१ श वीरवर सुतदान कथा—]

"अहं पुरा शूद्रकस्य राज्ञः क्रीडासरसि न्यवसम्।

तत्र वीरवरो नाम राजपुत्रः कुतश्चिद्देशादागत्य राजद्वारमुपगम्य प्रतीहारमुवाच—'अहं तावद्वर्तनार्थी राजपुत्रः। मां राजदर्शनं कारय।'

ततस्तेनासौ राजदर्शनं कारितो ब्रूते—'देव, यदि मया सेवकेन प्रयोजनमस्ति तदाऽस्मद्वर्तनं क्रियताम्।'

शूद्रक उवाच—'किं ते वर्तनम्।'

वीरवरो ब्रूते—'प्रत्यहं सुवर्णशत [चतुष्टय ?] म्।'

[टीका पु० पृ० १७१।२—१७३।१]

राजाह—'का ते सामग्री ।'

वीरवरो ब्रूते—'द्वौ बाहू, तृतीयश्च खड्गः ।'

राजाह—'नैतच्छक्यम् ।'

तच्छ्रुत्वा वीरवरः प्रणम्य चलितः ।

अथ मन्त्रिभिरुक्तम्—'देव, दिनचतुष्टयस्य वर्तनं दत्त्वा ज्ञायतामस्य स्वरूपम्—'किमुपयुक्तोऽयमेतावद्वर्तनं गृह्णाति, अनुपयुक्तो वा' इति ।'

ततो मन्त्रिवचनादाहूय वीरवराय ताम्बूलं दत्त्वा सुवर्णशतचतुष्टयं दत्तम् ।

तद्विनियोगश्च राज्ञा सुनिभृतं निरूपितः—'तदर्धं वीरवरेण देवेभ्यो ब्राह्मणेभ्यश्च दत्तम् । स्थितस्यार्धं दुःखितेभ्यः । तदवशिष्टं भोज्यव्ययविलास-व्ययेन ।'

एतत्सर्वं नित्यकृत्यं कृत्वा राजद्वारमहर्निशं खड्गपाणिः सेवते । यदा च राजा स्वयं समादिशति तदा स्वगृहमपि याति ।

अथ चतुर्दश्यां रात्रौ राजा सकरुणं क्रन्दनध्वनिं शुश्राव ।

शूद्रक उवाच—'कः कोऽत्र द्वारि ।'

तेनोक्तम्—'देव, अहं वीरवरः ।'

राजोवाच—'क्रन्दनानुसरणं क्रियताम् ।'

वीरवरः 'यथाज्ञापयति देवः' इत्युक्त्वा चलितः ।

राज्ञा च चिन्तितम्—'नैतदुचितम् । अयमेकाकी राजपुत्रो मया सूचीभेद्ये तमसि प्रेरितः । तदहमपि गत्वा 'किमेतत्' इति निरूपयामि ।'

ततो राजापि खड्गमादाय तदनुसरणक्रमेण नगराद्बहिर्निर्जगाम ।

गत्वा च वीरवरेण सा रुदती रूपयौवनसंपन्ना सर्वालङ्कारभूषिता काचित्स्त्री दृष्टा पृष्टा च—'का त्वम् । किमर्थं रोदिषीति ।'

स्त्रियोक्तम्—'अहमेतस्य शूद्रकस्य राज्ञो लक्ष्मीः । चिरादेतस्य भुजच्छायायां महता सुखेन विश्रान्ता । इदानीमन्यत्र गमिष्यामि ।'

वीरवरो ब्रूते—'यत्रापायः संभवति तत्रोपायोऽप्यस्ति । तत्कथं स्यात्पुनरिहावलम्बनं भगवत्याः ।'

[टीका पु० पृ० १७३।१—१७५।२]

लक्ष्मीरुवाच—'यदि त्वमात्मनः पुत्रं शक्तिधरं द्वात्रिंशल्लक्षणोपेतं भगवत्याः सर्वमङ्गलाया उपहारीकरोषि तदाहं पुनरत्र सुचिरं सुखं निवसामि' इत्युक्त्वादृश्याभवत्।

ततो वीरवरेण स्वगृहं गत्वा निद्राणा स्ववधूः प्रबोधिता पुत्रश्च।

तौ निद्रां परित्यज्योत्थायोपविष्टौ।

वीरवरस्तत्सर्वं लक्ष्मीवचनमुक्तवान्।

तच्छ्रुत्वा सानन्दः शक्तिधरो ब्रूते—'धन्योऽहमेवंभूतः स्वामिराज्यरक्षार्थं यस्योपयोगः। तत्तात कोऽधुना विलम्बस्य हेतुः। कदापि तावदेवंविध एव कर्मण्येतस्य देहस्य विनियोगः श्लाघ्यः। यतः—

धनानि जीवितं चैव परार्थे प्राज्ञ उत्सृजेत्।
सन्निमित्तं वरं त्यागो विनाशे नियते सति॥ ४८६॥'

शक्तिधरमातोवाच—'यद्येतन्न कर्तव्यं तत्केनान्येन कर्मणा मुख्यस्य राजवर्तनस्य निष्क्रयो भविष्यति।'

इत्यालोच्य सर्वे सर्वमङ्गलायाः स्थानं गताः।

तत्र सर्वमङ्गलां संपूज्य वीरवरो ब्रूते—'देवि, प्रसीद। विजयतां विजयतां शूद्रको महाराजः। गृह्यतामयमुपहारः' इत्युक्त्वा पुत्रस्य शिरश्चिच्छेद।

ततो वीरवरश्चिन्तयामास—'गृहीतराजवर्तनस्य तावन्निस्तारः कृतः। अधुना निष्पुत्रस्य मे जीवनं विडम्बनम्।' इत्यालोच्यात्मनः शिरश्छिन्नवान्।

ततः स्त्रियापि स्वामिनः पुत्रस्य च शोकार्तया तदनुष्ठितम्।

एतत्सर्वं श्रुत्वा दृष्ट्वा च स राजा साश्चर्यं चिन्तयामास—

'जीवन्ति च म्रियन्ते च मद्विधाः क्षुद्रजन्तवः।
अनेन सदृशो लोके न भूतो न भविष्यति॥ ४८७॥

तदेतत्परित्यक्तेन मम राज्येनापि न प्रयोजनम्।'

ततः स्वशिरश्छेत्तुमुल्लासितः खड्गः शूद्रकेणापि।

अथ भगवत्या सर्वमङ्गलया प्रत्यक्षभूतया राजा हस्ते धृतः, उक्तश्च—'पुत्र, प्रसन्नास्मि ते। एतावता साहसेनालम्। जीवनान्तेऽपि तव राज्यभङ्गो नास्ति।'

[टीका० पु० पृ० १७५।२—१७७।२]

राजा च साष्टाङ्गपातं प्रणम्योवाच—'देवि, किं मे राज्येन। जीवितेन वा किं प्रयोजनम्। यद्यहमनुकम्पनीयस्तदा ममायुःशेषेणायं सदारपुत्रो वीरवरो जीवतु। अन्यथाहं यथाप्राप्तां गतिं गच्छामि।'

भगवत्युवाच—'पुत्र, अनेन ते सत्त्वोत्कर्षेण भृत्यवात्सल्येन च सर्वथा संतुष्टास्मि। गच्छ विजयी भव। अयमपि सपरिवारो राजपुत्रो जीवतु।' इत्युक्त्वा देव्यदृश्याभवत्।

ततो वीरवरः सपुत्रदारः प्राप्तजीवनः स्वगृहं गतः।

राजापि तैरलक्षितः सत्वरं प्रासादगर्भं गत्वा तत्रैव सुप्तः।

अथ वीरवरो द्वारस्थः पुनर्भूपालेन पृष्टः सन्नुवाच—'देव, सा रुदती स्त्री मामवलोक्यादृश्याभवत्। न काप्यन्या वार्ता विद्यते।'

तद्वचनमाकर्ण्य संतुष्टो राजा साश्चर्यमचिन्तयत्—'कथमयं न श्लाघ्यो महासत्त्वः। यतः—

प्रियं ब्रूयादकृपणः शूरः स्यादविकत्थनः।
दाता नापात्रवर्षी च प्रगल्भः स्यादनिष्ठुरः॥ ४८८॥

एतन्महापुरुषलक्षणमेतस्मिन्सर्वमस्ति।'

ततः स राजा प्रातः शिष्टसभां कृत्वा सर्ववृत्तान्तं प्रस्तुत्य प्रसादात्तस्मै कर्णाटराज्यं ददौ॥"

तत्किमागन्तुको जातिमात्राद्दुष्टः। तत्राप्युत्तमाधममध्यमा सन्ति।

चक्रवाको ब्रूते—

योऽकार्यं कार्यवच्छास्ति स किंमन्त्री नृपेच्छया।
वरं स्वामिमनोदुःखं तन्नाशो न त्वकार्यतः॥ ४८९॥
वैद्यो गुरुश्च मन्त्री च यस्य राज्ञः प्रियंवदाः।
शरीरधर्मकोषेभ्यः क्षिप्रं स परिहीयते॥ ४९०॥

शृणु देव—

पुण्याल्लब्धं यदेकेन तन्ममापि भविष्यति।
हत्वा भिक्षुमतो लोभान्निध्यर्थी नापितो हतः॥ ४९१॥'

राजापृच्छति—'कथमेतत्।'

मन्त्री कथयति—

[टीका पु० पृ० १७७।२—१७९।२]

(२२ श नापित कथा—)

"अस्त्ययोध्यायां पुरि चूडामणिर्नाम क्षत्रियः । तेन धनार्थिना महता कायक्लेशेन भगवांश्चन्द्रार्धचूडामणिश्चिरमाराधितः । ततः क्षीणपापोऽसौ स्वप्ने दर्शनं दत्त्वा भगवदादेशाद्यक्षेश्वरेणादिष्टः— 'यत्त्वमद्य प्रातः क्षौरं कृत्वा लगुडहस्तः सन्स्वगृहद्वारि निभृतं स्थास्यसि । ततो यमेवागतं प्राङ्गणे भिक्षुकं पश्यसि तं निर्दयं लगुडप्रहारेण हनिष्यसि । ततोऽसौ भिक्षुः तत्क्षणात्सुवर्णपूर्णकलशो भविष्यति । तेन त्वया यावज्जीवं सुखिना भवितव्यम् ।'

ततस्तथानुष्ठिते तद्वृत्तम् ।

तत्र क्षौरकरणायानीतेन नापितेनालोक्य चिन्तितम्—'अये निधिप्राप्तेरयमुपायः । तदहमप्येवं किं न करोमि ।'

ततः प्रभृति स नापितः प्रत्यहं तथाविधो लगुडहस्तः सुनिभृतं भिक्षोरागमनं प्रतीक्षते । एकदा तेन तथा प्राप्तो भिक्षुर्लगुडेन हत्वा व्यापादितः । तस्मादपराधात्सोऽपि नापितो राजपुरुषैस्ताडितः पञ्चत्वं गतः ॥

अतोऽहं ब्रवीमि—'पुण्याल्लब्धं यदेकेन ४९१ इत्यादि ॥"

राजाह—

'पुरावृत्तकथोद्गारैः कथं निर्णीयते परः ।
स्यान्निष्कारणबन्धुर्वा किं वा विश्वासघातकः ॥४९२॥

यातु । प्रस्तुतमनुसंधीयताम् । मलयाधित्यकायां चेच्चित्रवर्णस्तदधुना किं विधेयम् ।'

मन्त्री वदति—'देव, आगतप्रणिधिमुखान्मया श्रुतं यन्महामन्त्रिणो गृध्रस्योपदेशे चित्रवर्णेनानादरः कृतः । अतोऽसौ मूढो जेतुं शक्यः । तथा चोक्तम्—

लुब्धः क्रूरोऽलसोऽसत्यः प्रमादी भीरुरस्थिरः ।
मूढो योधावमन्ता च सुखच्छेद्यो रिपुः स्मृतः ॥ ४९३ ॥

ततोऽसौ यावदस्मद्दुर्गद्वाररोधं न करोति तावन्नद्यद्रिवनवर्त्मसु तद्बलानि हन्तुं सारसादयः सेनापतयो नियुज्यन्ताम् । तथा चोक्तम्—

[टीका पु० पृ० १७६।२—१८१।१]

दीर्घवर्त्मपरिश्रान्तं नद्यद्रिवनसंकुलम् ।
घोराग्निभयसंत्रस्तं क्षुत्पिपासाहितक्लमम् ॥ ४९४ ॥
प्रमत्तं भोजनव्यग्रं व्याधिदुर्भिक्षपीडितम् ।
असंस्थितमभूयिष्ठं वृष्टिवातसमाकुलम् ॥ ४९५ ॥
पङ्कपांशुजलाच्छिन्नं सुव्यस्तं दस्युविद्रुतम् ।
एवंभूतं महीपालः परसैन्यं विघातयेत् ॥ ४९६ ॥
अवस्कन्दभयाद्राजा प्रजागरकृतश्रमम् ।
दिवा सुप्तं समाहन्यान्निद्राव्याकुलसैनिकम् ॥ ४९७ ॥

अतस्तस्य प्रमादिनो बलं गत्वा यथावकाशं दिवानिशं घ्नन्त्वस्मत्सेनापतयः।' तथानुष्ठिते चित्रवर्णस्य सैनिकाः सेनापतयश्च बहवो निहताः ।

ततश्चित्रवर्णो विषण्णः स्वमन्त्रिणं दूरदर्शिनमाह—'तात, किमित्यस्मदुपेक्षा क्रियते । किं वाप्यविनयो ममास्ति । तथा चोक्तम्—

न राज्यं प्राप्तमित्येव वर्तितव्यमसांप्रतम् ।
श्रियं ह्यविनयो हन्ति जरा रूपमिवोत्तमम् ॥ ४९८ ॥
दक्षः श्रियमधिगच्छति, पथ्याशी कल्यतां, सुखमरोगी, ।
उद्युक्तो विद्यान्तं, धर्मार्थयशांसि च विनीतः ॥ ४९९ ॥'

गृध्रोऽवदत्—देव, शृणु—

अविद्वानपि भूपालो विद्यावृद्धोपसेवया ।
परां श्रियमवाप्नोति जलासन्नतरुर्यथा ॥ ५०० ॥
पानं स्त्री मृगया द्यूतमर्थदूषणमेव च ।
वाग्दण्डयोश्च पारुष्यं व्यसनानि महीभुजाम् ॥ ५०१ ॥
न साहसैकान्तरसानुवर्तिना
न चाप्युपायोपहतान्तरात्मना ।

[टीका पु० पृ० १८१।१—१८३।२]

विभूतयः शक्यमवाप्तुमूर्जिता
नये च शौर्ये च वसन्ति संपदः ॥ ५०२ ॥

त्वया स्वबलोत्साहमवलोक्य साहसैकरसिना मयोपन्यस्तेष्वपि मन्त्रेष्वनवधानं वाक्पारुष्यं च कृतम् । अतो दुर्नीतेः फलमिदमनुभूयते । तथा चोक्तम् ।

दुर्मन्त्रिणं कमुपयान्ति न नीतिदोषाः
संतापयन्ति कमपथ्यभुजं न रोगाः ।
कं श्रीर्न दर्पयति कं न निहन्ति मृत्युः
कं स्वीकृता न विषयाः परितापयन्ति ॥५०३॥

मुदं विषादः शरदं हिमागमस्तमो विवस्वान्सुकृतं कृतघ्नता ।
प्रियोपपत्तिः शुचमापदं नयःश्रियं समृद्धामपि हन्ति दुर्नयः ॥५०४॥'

ततो मयाप्यालोचितम्—प्रज्ञाहीनोऽयं राजा । नो चेत्कथं नीतिशास्त्रकथाकौमुदीं वागुल्काभिस्तिमिरयति । यतः—

यस्य नास्ति स्वयं प्रज्ञा शास्त्रं तस्य करोति किम् ।
लोचनाभ्यां विहीनस्य दर्पणः किं करिष्यति ॥ ५०५ ॥'

तेनाहमपि तूष्णीं स्थितः ।

अथ राजा बद्धाञ्जलिराह—'तात, अस्त्ययं ममापराधः । इदानीमहं यथावशिष्टबलसहितः प्रत्यावृत्य विन्ध्याचलं गच्छामि तथोपदिश ।'

गृध्रः स्वगतं चिन्तयति—'क्रियतामत्र प्रतीकारः । यतः—

देवतासु गुरौ गोषु राजसु ब्राह्मणेषु च ।
नियन्तव्यः सदा कोपो बालवृद्धातुरेषु च ॥ ५०६ ॥'

मन्त्री विहस्य ब्रूते—'देव, मा भैषीः । समाश्वसिहि । शृणु देव—

मन्त्रिणां भिन्नसंधाने भिषजां सान्निपातके ।
कर्मणि व्यज्यते प्रज्ञा 'सुस्थे को वा न पण्डितः' ॥ ५०७ ॥
आरभन्तेऽल्पमेवाज्ञाः कामं व्यग्रा भवन्ति च ।
महारम्भाः कृतधियस्तिष्ठन्ति च निराकुलाः ॥ ५०८ ॥

[टीका पु० पृ० १८३।२—१८५।२]

तदत्र भवत्प्रतापादेव दुर्गं भङ्क्त्वा कीर्तिप्रतापसहितं त्वामचिरेण कालेन विन्ध्याचलं नेष्यामि।'

राजाह—'कथमधुना स्वल्पबलेन तत्संपद्यते।'

गृध्रो वदति—'देव, सर्वं भविष्यति। यतो विजिगीषोरदीर्घसूत्रता विजयसिद्धेरवश्यंभावः। तत्सहसैव दुर्गद्वारावरोधः क्रियताम्।'

अथ प्रणिधिना बकेनागत्य हिरण्यगर्भस्य कथितम्—'देव, स्वल्पबल एवायं राजा चित्रवर्णो गृध्रस्य मन्त्रोपष्टम्भादागत्य दुर्गद्वारावरोधं करिष्यति।'

राजहंसो ब्रूते—'सर्वज्ञ, किमधुना विधेयम्।'

चक्रो ब्रूते—'स्वबले सारासारविचारः क्रियताम्। तज्ज्ञात्वा सुवर्णवस्त्रादिकं यथार्हं प्रसादप्रदानं क्रियताम्। यतः—

'यः काकिनीमप्यपथप्रपन्नां समुद्धरेन्निष्कसहस्रतुल्याम्।
कालेषु कोटिष्वपि मुक्तहस्तस्तं राजसिंहं न जहाति लक्ष्मीः॥५०९॥
क्रतौ विवाहे व्यसने रिपुक्षये यशस्करे कर्मणि मित्रसंग्रहे।
प्रियासु नारीष्वधनेषु बन्धुषु ह्यतिव्ययो नास्ति नराधिपाष्टसु॥५१०॥
मूर्खः स्वल्पव्ययत्रासात्सर्वनाशं करोति हि।
कः सुधीस्त्यजते भाण्डं शुल्कस्यैवातिसाध्वसात्॥ ५११॥

राजाह—'कथमिह सर्वदातिव्ययो युज्यते। उक्तं च—
'आपदर्थे धनं रक्षेत्।'
मन्त्री ब्रूते— 'श्रीमतः कथमापदः।'
राजाह—'कदाचिच्च चलेल्लक्ष्मीः'
मन्त्री ब्रूते— 'संचितापि विनश्यति॥ ५१२॥

तद्देव, कार्पण्यं विमुच्य स्वसुभटाः दानमानाभ्यां पुरस्क्रियन्ताम्। तथा चोक्तम्—

परस्परज्ञाः संहृष्टास्त्यक्तुं प्राणान्सुनिश्चिताः।
कुलीनाः पूजिताः सम्यग्विजयन्ते द्विषद्बलम्॥ ५१३॥

[टीका पु० पृ० १८५।२—१८७।१]

सुभटाः शीलसंपन्नाः संहताः कृतनिश्चयाः।
अपि पञ्चशतं शूरा मृद्नन्ति रिपुवाहिनीम् ॥ ५१४ ॥

शिष्टैरप्यविशेषज्ञ उग्रश्च कृतनाशकः।
त्यज्यते किं पुनर्नान्यैर्यश्चाप्यात्मंभरिर्नरः ॥ ५१५ ॥

सत्यं शौर्यं दया त्यागो नृपस्यैते महागुणाः।
एतैस्त्यक्तो महीपालः प्राप्नोति खलु वाच्यताम् ॥ ५१६ ॥

ईदृशि प्रस्तावेऽमात्यास्तावदवश्यमेव पुरस्कर्तव्याः। तथा चोक्तम्—

यो येन प्रतिबद्धः स्यात्सह तेनोदयी व्ययी।
स विश्वस्तो नियोक्तव्यः प्राणेषु च धनेषु च ॥ ५१७ ॥

धूर्तः स्त्री वा शिशुर्यस्य मन्त्रिणः स्युर्महीपतेः।
अनीतिपवनक्षिप्तः कार्याब्धौ स निमज्जति ॥ ५१८ ॥

शृणु देव—

हर्षक्रोधौ यतौ यस्य कोषाः स्वप्रत्ययेन च।
नित्यं भृत्यान्ववेक्षा च तस्य स्याद्धनदा धरा ॥ ५१९ ॥

येषां राज्ञा सह स्यातामुच्चयापचयौ ध्रुवम्।
अमात्या इति तान्राजा नावमन्येत कर्हिचित् ॥ ५२० ॥

महीभुजो मदान्धस्य विषमे कार्यसागरे।
स्खलतो हि करालम्बः सुहृत्सचिवचेष्टितम् ॥ ५२१ ॥

अथागत्य प्रणम्य मेघवर्णो ब्रूते—'देव, दृष्टिप्रसादं कुरु। एष युद्धार्थी विपक्षो दुर्गद्वारि वर्तते। तद्देवपादादेशाद्बहिर्निःसृत्य स्वविक्रमं दर्शयामि। तेन देवप्रसादानामानृण्यमुपगच्छामि।'

चक्रो ब्रूते—'मैवम्। यदि बहिर्निःसृत्य योद्धव्यं तदा दुर्गाश्रयणमेव निष्प्रयोजनम्। अपरंच—

[टीका पु० पृ० १८७।१—१८६।१]

विषमोऽपि यथा नक्रः सलिलान्निःसृतो वशः ।
वनाद्विनिर्गतः शूरः सिंहोऽपि स्याच्छृगालवत् ॥ ५२२ ॥

देव, स्वयं गत्वा दृश्यतां युद्धम् । यतः—

पुरस्कृत्य बलं राजा योधयेदवलोकयन् ।
स्वामिनाधिष्ठितः श्वापि किं न सिंहायते ध्रुवम् ॥ ५२३ ॥'

अनन्तरं ते सर्वे दुर्गद्वारं गत्वा महाहवं कृतवन्तः ।

अपरेद्युश्चित्रवर्णो राजा गृध्रमुवाच—'तात, तत् स्वप्रतिज्ञातमधुना निर्वाहय ।'

गृध्रो ब्रूते—'देव, शृणु तावत्—

अकालसहमत्यल्पं मूर्खव्यसनिनायकम् ।
अगुप्तं भीरुयोधं च दुर्गव्यसनमुच्यते ॥ ५२४ ॥

तत्तावदत्र नास्ति ।

उपजापश्चिरारोधोऽवस्कन्दस्तीव्रपौरुषम् ।
दुर्गस्य लङ्घनोपायाश्चत्वारः कथिता इमे ॥५२५ ॥

अत्र च यथाशक्ति क्रियते यत्नः ! (कर्णे कथयति)—'एवमेव ।'

ततोऽनुदित एव भास्करे चतुर्ष्वपि दुर्गद्वारेषु प्रवृत्ते युद्धे दुर्गाभ्यन्तरगृहेष्वेकदा काकैरग्निर्निक्षिप्तः ।

ततः 'गृहीतं गृहीतं दुर्गम्, इति कोलाहलं श्रुत्वानेकगृहेषु प्रदीप्तं पावकं प्रत्यक्षेणावलोक्य राजहंसस्य सैनिकास्तथान्ये दुर्गवासिनः सत्वरं ह्रदं प्रविष्टाः । यतः—

सुमन्त्रितं सुविक्रान्तं सुयुद्धं सुपलायितम् ।
प्राप्ते काले यथाशक्ति कुर्यान्न तु विचारयेत् ॥ ५२६ ॥

राजहंसस्य सुखिस्वभावान्मन्दगतिः सारसद्वितीयश्च चित्रवर्णस्य सेनापतिना कुक्कुटेनागत्य वेष्टितः ।

हिरण्यगर्भः—सारसमाह—'सारस सेनापते, ममानुरोधादात्मानं न व्यापादयिष्यसि । गन्तुं त्वमधुनापि समर्थः । तद्गत्वा जलं प्रविश्यात्मानं परिरक्ष । अस्मत्पुत्रं चूडामणिनामानं सर्वज्ञसंमत्या राजानं करिष्यसि ।'

[टीका पु० पृ० १८९।१—१९०।३]

सारसो ब्रूते—'देव न वक्तव्यमेवं दुःसहं वचः । यावच्चन्द्रार्कौ दिवि तिष्ठतस्तावद्विजयतां देवः । अहं देव, दुर्गाधिकारी । मन्मांसासृग्विलिप्तेन द्वारवर्त्मना प्रविशतु शत्रुः । अपरं च देव—

क्षमी दाता गुणग्राही स्वामी दुःखेन लभ्यते ।'

राजाह—'सत्यमेवैतत् । किन्तु,

शुचिर्दक्षोऽनुरक्तश्च जाने भृत्योऽपि दुर्लभः ॥ ५२७ ॥'

सारसो ब्रूते—'शृणु देव,

यदि समरमपास्य नास्ति मृत्यो-
र्भयमिति युक्तमितोऽन्यतः प्रयातुम् ।
अथ मरणमवश्यमेव जन्तोः
किमिति मुधा मलिनं यशः क्रियेत ॥ ५२८ ॥

भवेऽस्मिन्पवनोद्भ्रान्तवीचिविभ्रमभङ्गुरे ।
जायते पुण्ययोगेन परार्थे जीवितव्ययः ॥ ५२९ ॥

स्वाम्यमात्यश्च राष्ट्रं च दुर्गं कोषो बलं सुहृत् ।
राज्याङ्गानि प्रकृतयः पौराणां श्रेणयोऽपि च ॥ ५३० ॥

अत्रापि प्रधानं राज्याङ्गं स्वामी सर्वथा रक्षणीयः । यतः—

प्रकृतिः स्वामिना त्यक्ता समृद्धापि न जीवति ।
अपि धन्वन्तरिर्वैद्यः किं करोति गतायुषि ॥ ५३१ ॥

नरेशे जीवलोकोऽयं निमीलति निमीलति ।
उदेत्युदीयमाने च रवाविव सरोरुहम् ॥ ५३२ ॥'

अथ कुक्कुटेनागत्य राजहंसस्य शरीरे खरतरनखाघातः कृतः । ततः सत्वरमुपसृत्य सारसेन स्वदेहान्तरितो राजा । अनन्तरं कुक्कुटेन नखमुखप्रहारैर्जर्जरीकृतेन सारसेन स्वाङ्गेनाच्छाद्य प्रेर्य राजा जले क्षिप्तः । कुक्कुटसेनापतिश्च चञ्चुप्रहारेण व्यापादितः । पश्चात्सारसोऽपि बहुभिः संभूय व्यापादितः ।

[टीका पु० पृ० १६०।३—१६१।४]

अथ चित्रवर्णो दुर्गं प्रविश्य दुर्गावस्थितं द्रव्यं ग्राहयित्वा बन्दिभिर्जयशब्दैरानन्दितः स्वस्कन्धावारं जगाम ।

अथ राजपुत्रैरुक्तम्—'तस्मिन्राजबले स पुण्यवान्सारस एव, येन स्वदेहत्यागेन स्वामी रक्षितः । उक्तं चैतत्—

जनयन्ति सुतान् गावः सर्वा एव गवाकृतीन् ।
विषाणोल्लिखितस्कन्धं काचिदेव गवां पतिम् ॥ ५३३ ॥

विष्णुशर्मोवाच—'स तावद्विद्याधरीपरिजनः स्वर्गसुखमनुभवतु महासत्त्वः । तथा चोक्तम्—

'आहवेषु च ये शूराः स्वाम्यर्थे त्यक्तजीविताः ।
भर्तृभक्ताः कृतज्ञाश्च ते नराः स्वर्गगामिनः ॥ ५३४ ॥
यत्र यत्र हतः शूरः शत्रुभिः परिवेष्टितः ।
अक्षयांल्लभते लोकान्यदि क्लैब्यं न गच्छति ॥ ५३५ ॥

विग्रहः श्रुतो भवद्भिः ॥'

राजपुत्रैरुक्तम्—'श्रुत्वा सुखिनो भूता वयम् ।'

विष्णुशर्माब्रवीत्—'अपरमप्येवमस्तु—

विग्रहः करितुरङ्गपत्तिभि-
र्नो कदापि भवतान्महीभृताम् ।
नीतिमन्त्रपवनैः समाहताः
संश्रयन्तु गिरिगह्वरं द्विषः ॥ ५३६ ॥'

इति हितोपदेशे विग्रहो नाम तृतीयः कथासंग्रहः समाप्तः ।

———

[टीका पु० पृ० १९१।४—१९३।१]

संधिः ।

पुनः कथारम्भकाले राजपुत्रैरुक्तम्—'आर्य, विग्रहः श्रुतोऽस्माभिः । सन्धिरधुनाऽभिधीयताम् ।'

विष्णुशर्मणोक्तम्—'श्रूयताम् । सन्धिमपि कथयामि । यस्यायमाद्यः श्लोकः—

वृत्ते महति सङ्ग्रामे राज्ञोर्निहतसेनयोः ।
स्थेयाभ्यां गृध्रचक्राभ्यां वाचा सन्धिः कृतः क्षणात् ॥५३७॥'

राजपुत्रा ऊचुः—'कथमेतत् ।'

विष्णुशर्मा कथयति—

"ततस्तेन राजहंसेनोक्तम्—'केनास्मद्दुर्गे निक्षिप्तोऽग्निः । किं पारक्येण किंवास्मद्दुर्गवासिना केनापि विपक्षप्रयुक्तेन ।'

चक्रो ब्रूते—'देव, भवतो निष्कारणबन्धुरसौ मेघवर्णः सपरिवारो न दृश्यते, तन्मन्ये तस्यैव विचेष्टितमिदम् ।'

राजा क्षणं विचिन्त्याह—'अस्ति तावदेव मम दुर्दैवमेतत् । तथा चोक्तम्—

अपराधः स दैवस्य न पुनर्मन्त्रिणामयम् ।
कार्यं सुघटितं क्वापि दैवयोगाद्विनश्यति ॥५३८॥'

मन्त्री ब्रूते—'उक्तमेवैतत्—

विषमां हि दशां प्राप्य दैवं गर्हयते नरः ।
आत्मनः कर्मदोषांस्तु नैव जानात्यपण्डितः ॥५३९॥
सुहृदां हितकामानां यो वाक्यं नाभिनन्दति ।
स कूर्म इव दुर्बुद्धिः काष्ठाद्भ्रष्टो विनश्यति ॥५४०॥'

राजाह—'कथमेतत् ।'

मन्त्री कथयति—

[२३ हंस कूर्म कथा]

"अस्ति मगधदेशे फुल्लोत्पलाभिधानं सरः ।

[टीका पु० पृ० १६३।१—१६४।४]

तत्र चिरं संकटविकटनामानौ हंसौ निवसतः। तयोर्मित्रं कम्बुग्रीव नामा कूर्मश्च प्रतिवसति।

अथैकदा धीवरैरागत्य तत्रोक्तम्—'यदत्रास्माभिरद्योषित्वा प्रातर्मत्स्य-कूर्मादयो व्यापादयितव्याः।'

तदाकर्ण्य कूर्मो हंसावाह—'सुहृदौ, श्रुतोऽयं धीवरालापः। अधुना किं मया कर्तव्यम्।'

हंसावाहतुः—'ज्ञायताम्। पुनस्तावत्प्रातर्यदुचितं तत्कर्तव्यम्।'

कूर्मो ब्रूते—'मैवम्। यतो दृष्टव्यतिकरोऽहमत्र। तथा चोक्तम्—

अनागतविधाता च प्रत्युत्पन्नमतिस्तथा।
द्वावेतौ सुखमेधेते यद्भविष्यो विनश्यति ॥५४१॥'

तावाहतुः—'कथमेतत्।'

कूर्मः कथयति—

[२४ श मत्स्यत्रय कथा--]

पुरास्मिन्नेव सरस्येवंविधेषु धीवरेषूपस्थितेषु मत्स्यत्रयेणालोचितम्। तत्रानागतविधाता नामैको मत्स्यः। तेनालोचितम्—'अहं तावज्जलाशयान्तरं गच्छामि' इत्युक्त्वा ह्रदान्तरं गतः।

अपरेण प्रत्युत्पन्नमतिनाम्ना मत्स्येनाभिहितम्—'भविष्यदर्थे प्रमाणाभावात्कुत्र मया गन्तव्यम्। तदुत्पन्ने कार्ये यथाकार्यमनुष्ठेयम्।'

ततो यद्भविष्येणोक्तम्—

'यदभावि न तद्भावि भावि चेन्न तदन्यथा।
इति चिन्ताविषघ्नोऽयमगदः किं न पीयते ॥५४२॥'

ततः प्रातर्जालेन बद्धः प्रत्युत्पन्नमतिर्मृतवदात्मानं संदर्श्य स्थितः ततो जालादपसारितो यथाशक्त्युत्प्लुत्य गभीरं नीरं प्रविष्टः। यद्भविष्यश्च धीवरैः प्राप्तो व्यापादितः॥"

अतोऽहं ब्रवीमि—'अनागतविधाता, (५४१) इत्यादि॥

—:०:—

तद्यथाहमन्यद्ह्रदमद्य प्राप्नोमि तथा क्रियताम्।"

[टीका पु० पृ० १६४।४—१६६।२]

हंसावाहतुः—'जलाशयान्तरे प्राप्ते तव कुशलम् । स्थले गच्छतस्ते को विधिः ।'

कूर्म आह—'यथाहं भवद्भ्यां सहाकाशवर्त्मना यामि स उपायो विधीयताम् ।'

हंसौ ब्रूतः—'कथमुपायः संभवति ।'

कच्छपो वदति—'युवाभ्यां चञ्चुधृतं काष्ठखण्डमेकं मया मुखेनावलम्बितव्यम् । युवयोः पक्षबलेन मयापि सुखेन गन्तव्यम् ।'

हंसौ ब्रूतः—'संभवत्येष उपायः । किंतु—

उपायं चिन्तयन्प्राज्ञो ह्यपायमपि चिन्तयेत् ।
पश्यतो बकमूर्खस्य नकुलैर्भक्षिताः प्रजाः ॥५४३॥'

कूर्मः पृच्छति—'कथमेतत् ।'

तौ कथयतः—

[२५ श बक-नकुल-कथा--]

"अस्त्युत्तरापथे गृध्रकूटो नाम पर्वतः ।

तत्रैरावतीतीरे न्यग्रोधपादपे बका निवसन्ति ।

तस्य वृक्षस्याधस्ताद्विवरे सर्पस्तिष्ठति । स च तेषां बालापत्यानि खादति ।

अथ शोकार्तानां बकानां विलापं श्रुत्वा केनचिद्बकेनाभिहितम्—'एवं कुरुत यूयम्—'मत्स्यानादाय नकुलविवरादारभ्य सर्पविवरं यावत्पङ्क्तिक्रमेणैकैकशो मत्स्यान् विकीर्य धत्त । ततस्तदाहारलुब्धैर्नकुलैरागत्य सर्पो द्रष्टव्यः स्वभावविद्वेषाद्व्यापादयितव्यश्च ।'

तथानुष्ठिते तद्वृत्तम् ।

ततस्तत्र वृक्षे नकुलैर्बकशावकानां रावः श्रुतः । पश्चात्तैर्वृक्षमारुह्य बकशावकाः खादिताः ॥

अत आवां ब्रूवः— 'उपायं चिन्तयन्' (५४३) इत्यादि ॥"

—:o:—

'आवाभ्यां नीयमानं त्वामवलोक्य लोकैः किंचिद्वक्तव्यमेव । तदाकर्ण्य यदि त्वमुत्तरं दास्यसि तदात्वन्मरणम् । तत्सर्वथाऽत्रैव स्थीयताम् ।'

[टीका पु० पृ० १६६।२—१६७।४]

कूर्मो वदति—'किमहमज्ञः। न किमपि मया वक्तव्यम्।'

ततस्तथानुष्ठिते तथाविधं कूर्ममालोक्य सर्वे **गोरक्षकाः** पश्चाद्धावन्ति वदन्ति च।

तत्र कश्चिदाह—'यद्ययं कूर्मः पतति तदात्रैव पक्त्वा खादितव्यः।'

कश्चिद्वदति—'अत्रैव दग्ध्वा खादितव्योऽयम्।'

कश्चिद्ब्रूते—'गृहं नीत्वा भक्षणीयः' इति।

तत्परुषवचनं श्रुत्वा स **कूर्मः** कोपाविष्टो विस्मृतपूर्वसंस्कारः प्राह—'**यु**-ष्माभिर्भस्म भक्षितव्यम्।'

इति वदन्नेव पतितो **गोरक्षकैः** पक्त्वा खादितश्च॥"

अतोऽहं ब्रवीमि '**सुहृदां हितकामानाम्**' (५४०) इत्यादि।"

अथ प्रणिधिर्बकस्तत्रागत्योवाच—'देव, प्रागेव मया निगदितम्—'दुर्ग-शोधनं हि प्रतिक्षणं कर्तव्यम्' इति। तच्च युष्माभिर्न कृतम्। अतस्तदनवधा-नस्य फलमनुभूतम्। दुर्गदाहश्चायं **मेघवर्ण**नाम्ना वायसेन गृध्रप्रयुक्तेन कृतः।'

राजा निःश्वस्याह—

'प्रणयादुपहाराद्वा यो विश्वसिति शत्रुषु।
स सुप्त इव वृक्षाग्रात्पतितः प्रतिबुध्यते॥५४४॥'

प्रणिधिरुवाच—'इतो दुर्गदाहं विधाय यदा गतो **मेघवर्णस्तदा चित्रवर्णेन** प्रसादितेनोक्तम्—'अयं **मेघवर्णो**ऽत्र कर्पूरद्वीपराज्येऽभिषि-च्यताम्। तथा चोक्तम्—

कृतकृत्यस्य भृत्यस्य कृतं नैव प्रणाशयेत्।
फलेन मनसा वाचा दृष्ट्या चैनं प्रहर्षयेत्॥५४५॥'

चक्रवाको ब्रूते—'ततस्ततः।'

प्रणिधिरुवाच—'ततः प्रधानमन्त्रिणा गृध्रेणाभिहितम्—'देव, नेदमु-चितम्। प्रसादान्तरं किमपि क्रियताम्। यतः—

अविचारयतो युक्तिकथनं तुषकण्डनम्।
नीचेषूपकृतं राजन्वालुकास्विव मूत्रितम्॥५४६॥

[टीका पु० पृ० १६७।४—१६६।२]

महतामास्पदे नीचः कदापि न कर्तव्यः। यथा चोक्तम्—

नीचः श्लाघ्यपदं प्राप्य स्वामिनं हन्तुमिच्छति।
मूषिको व्याघ्रतां प्राप्य मुनिं हन्तुं गतो यथा ॥५४७॥'

चित्रवर्णः पृच्छति—'कथमेतत्।'

मन्त्री कथयति—

[२६ श मुनि मूषक कथा—]

"अस्ति गौतमस्य महर्षेस्तपोवने महातपा नाम मुनिः।

तेनाश्रमसन्निधाने मूषिकशावकः काकमुखाद्भ्रष्टो दृष्टः।

ततः स्वभावदयात्मना तेन मुनिना नीवारकणैः संवर्धितः।

ततो बिडालस्तं मूषिक खादितुमुपधावति।

तमवलोक्य मूषिकस्तस्य मुनेः क्रोडे प्रविवेश।

ततो मुनिनोक्तम्—'मूषिक, त्वं मार्जारो भव।'

ततः स विडालः कुक्कुरं दृष्ट्वा पलायते।

मुनिनोक्तम्—'कुक्कुराद्बिभेषि। त्वमेव कुक्कुरो भव।'

स च कुक्कुरो व्याघ्राद्बिभेति।

ततस्तेन मुनिना कुक्कुरो व्याघ्रः कृतः।

अथ व्याघ्रमपि तं मूषिकनिर्विशेषं पश्यति स मुनिः॥

अथ तं मुनिं दृष्ट्वा व्याघ्रं च सर्वे वदन्ति—'अनेन मुनिना मूषिको व्याघ्रतां नीतः।'

एतच्छ्रुत्वा स व्याघ्रः सव्यथोऽचिन्तयम्—'यावदनेन मुनिना जीवितव्यं तावदिदं मे स्वरूपाख्यानमकीर्तिकरं न पलायिष्यते' इत्यालोच्य मुनिं हतुं गतः।

ततो मुनिना तज्ज्ञात्वा 'पुनर्मूषिको भव' इत्युक्त्वा मूषिक एव कृतः।

अतोऽहं ब्रवीमि—'नीचः श्लाघ्यपदम्' (५४७) इत्यादि॥"

—:०:—

अपरं च—सुकरमिदमिति न मन्तव्यम्। शृणु—

भक्षयित्वा बहून्मत्स्यानुत्तमाधममध्यमान्।
अतिलोभाद्बकः पश्चान्मृतः कर्कटकग्रहात् ॥५४८॥

[टीका पु० पृ० १९९।२—२००।४]

चित्रवर्णः पृच्छति—'कथमेतत् ।'

मन्त्री कथयति—

[२७ श बक-कर्कटक कथा—]

"अस्ति मालवविषये पद्मगर्भाभिधानं सरः ।

तत्रैको वृद्धो **बकः** सामर्थ्यहीन उद्विग्नमिवात्मानं दर्शयित्वा स्थितः ।

स च केनचित्**कुलीरेण** दृष्टः पृष्टश्च—'किमिति भवानत्राहारत्यागेन तिष्ठति ।'

बकेनोक्तम्—'भद्र, शृणु मत्स्या मम जीवनहेतवः । 'ते चावश्यं कैवर्तै-रागत्य व्यापादनीयाः' इति वार्ता नगरोपान्ते मया श्रुता । अतो 'वर्तना-भावादेवास्मन्मरणमुपस्थितम्' इति ज्ञात्वाहारेऽप्यनादरः कृतः ।'

ततः सर्वै**र्मत्स्यै**रालोचितम्—इह समये तावदुपकारक एवायं लक्ष्यतेऽस्मा-कम् । तदयमेव यथाकर्तव्यं पृच्छ्यताम् । तथा चोक्तम्—

> **उपकर्त्राऽरिणा संधिर्न मित्रेणापकारिणा ।**
> **उपकारापकारौ हि लक्ष्यं लक्षणमेतयोः ॥५४९॥'**

मत्स्या ऊचुः—'भो बक कोऽत्र रक्षणोपायः ।'

बको ब्रूते—'अस्ति रक्षणोपायो जलाशयान्तराश्रयणम् । तत्राहमेकै-कशो युष्मान्नयामि ।'

मत्स्या आहुः—'एवमस्तु ।

ततोऽसौ **बक**स्तान्मत्स्यानेकैकशो नीत्वा खादति ।

अनन्तरं **कुलीर**स्तमुवाच—'भो बक, मामपि तत्र नय ।'

ततो **बको**ऽप्यपूर्वकुलीरमांसार्थी सादरं तं नीत्वा स्थले धृतवान् ।

कुलीरोऽपि मत्स्यकण्टकाकीर्णं तत्स्थलमालोक्याचिन्तयत् 'हा, हतोऽस्मि मन्दभाग्यः । भवतु । इदानीं समयोचितं व्यवहरामि । यतः—

> **तावद्भयस्य भेतव्यं यावद्भयमनागतम् ।**
> **आगतं तु भयं वीक्ष्य प्रहर्तव्यमभीतवत् ॥५५०॥**

[टीका पु० पृ० २००।४—२०२।३]

अभियुक्तो यदा पश्येन्न किञ्चिद्धितमात्मनः ।
युद्ध्यमानस्तदा प्राज्ञो म्रियेत रिपुणा सह ॥५५१॥

यत्रायुद्धे ध्रुवो नाशो युद्धे जीवितसंशयः ।
तं कालमेकं युद्धस्य प्रवदन्ति मनीषिणः ॥५५२॥'

इत्यालोच्य स कुलीर स्तस्य ग्रीवां चिच्छेद । स बक पञ्चत्वं गतः ।

अतोऽहं ब्रवीमि 'भक्षयित्वा बहून्मत्स्यान् ५४८' इत्यादि ॥"

--:०:—

ततः पुनः स चित्रवर्णो राजाऽवदत्'शृणु यावन्मन्त्रिन्, मयैतदालोचितमस्ति यदत्रावस्थितेन मेघवर्णेन राज्ञो यावन्ति वस्तूनि कर्पूरद्वीपस्योत्तमानि तावन्त्यस्माकमुपनेतव्यानि । तेन महता विलासेनास्माभिर्विन्ध्याचले स्थातव्यम् ।'

दूरदर्शी विहस्याह—'देव,

अनागतवतीं चिन्ता कृत्वा यस्तु प्रहृष्यति ।
स तिरस्कारमाप्नोति भग्नभाण्डो द्विजो यथा ॥५५३॥'

राजाह—'कथमेतत् ।'

मन्त्री कथयति—

[२८ श भग्न भाण्डद्विज कथा—]

"अस्ति देवीकोटनाम्नि नगरे देवशर्मा नाम ब्राह्मणः ।

तेन महाविषुवत्संक्रान्त्यां सक्तुपूर्णशराव एकः प्राप्तः ।

ततस्तमादायासौ कुम्भकारस्य भाण्डपूर्णमण्डपिकैकदेशे रौद्रेणाकुलितः सुप्तः ।

ततः सक्तुरक्षार्थं हस्ते दण्डमेकमादायाचिन्तयत्—'यद्यहं सक्तुशरावं विक्रीय दश कपर्दकान् प्राप्स्यामि तदात्रैव तैः कपर्दकैर्घटशरावादिकमुपक्रीयानेकधा वृद्धैस्तद्धनैः पुनः पुनः पूगवस्त्रादिकमुपक्रीय लक्षसंख्यानि धनानि कृत्वा विवाहचतुष्टयं करिष्यामि । अनन्तरं तासु सपत्नीषु रूपयौवनवती या तस्यामधिकानुरागं करिष्यामि । अनन्तरं संजातेर्ष्यास्त-

[टीका पु० पृ० २०२।३—२०४।१]

त्सपत्न्यो यदा द्वन्द्वं करिष्यन्ति तदा कोपाकुलोऽहं ताम् इत्थं लगुडेन ताडयिष्यामि ।' इत्यभिधाय तेन लगुडः क्षिप्तः ।

तेन स सक्तुशरावश्चूर्णितो भाण्डानि च बहूनि भग्नानि ।

ततस्तेन शब्देनागतेन कुम्भकारेण तथाविधानि भाण्डान्यवलोक्य ब्राह्मणस्तिरस्कृतो मण्डपिकागर्भाद्बहिष्कृतश्च ॥

अतोऽहं ब्रवीमि—'अनागतवतीं चिन्ताम्' (५५३) इत्यादि ॥"

—:o:—

ततो राजा रहसि गृध्रमुवाच—'तात, यथाकर्तव्यमुपदिश ।'

गृध्रो ब्रूते—

'मदोद्धतस्य नृपतेः संकीर्णस्येव दन्तिनः ।
गच्छन्त्युन्मार्गयातस्य नेतारः खलु वाच्यताम् ॥५५४॥

शृणु देव, किमस्माभिर्बलदर्पाद्दुर्गं भग्नं नैव, भवतः प्रतापाधिष्ठितेनोपायेन ।'

राजाह –'नहि नहि । भवतामुपायेन ।'

गृध्रो ब्रूते—'यद्यस्मद्वचनं क्रियते तदा स्वदेशे गम्यताम् अन्यथा वर्षाकालेप्राप्तेतुल्यबलेन सह पुनर्विग्रहे सत्यस्माकं परभूमिष्ठानां स्वदेशगमनमपि दुर्लभं भविष्यति । सुखशोभार्थं च संधाय गम्यताम् । दुर्गं भग्नं च कीर्तिश्लब्धैव । मम संमतं तावदेतत् । यतः—

यो हि धर्मं पुरस्कृत्य हित्वा भर्तुः प्रियाप्रिये ।
अप्रियाण्याह तथ्यानि तेन राजा सहायवान् ॥५५५॥
युद्धे विनाशो भवति कदाचिदुभयोरपि ।
न हि संशयितं कुर्यादित्युवाच बृहस्पतिः ॥५५६॥
सुहृद्बलं तथा राज्यमात्मानं कीर्तिमेव च ।
युधि संदेहदोलास्थं को हि कुर्यादबालिशः ॥५५७॥
संधिमिच्छेत्समेनापि संदिग्धो विजयो युधि ।
सुन्दोपसुन्दावन्योन्यं नष्टौ तुल्यबलौ न किम् ॥५५८॥

[टीका पु० पृ० २०४।१—२०५।४]

राजोवाच—'कथमेतत् ।'

मन्त्री कथयति—

[२९ श सुन्दोपसुन्द कथा—]

"पुरा दैत्यौ सहोदरौ सुन्दोपसुन्दनामानौ महता कायक्लेशेन त्रैलोक्य-राज्यकामनया चिराच्चन्द्रशेखरमाराधितवन्तौ ।

ततस्तयोर्भगवान्परितुष्टः 'वरं वरयतम्' इत्युवाच ।

अनन्तरं तयोः समधिष्ठितया सरस्वत्या तावन्यद्वक्तुकामावन्यदभिहित-वन्तौ—'यद्यावयोर्भवान्परितुष्टस्तदा स्वप्रियां पार्वतीं परमेश्वरो ददातु ।'

अथ भगवता क्रुद्धेन वरदानस्यावश्यकतया विचारमूढयोः पार्वती प्रदत्ता ।

ततस्तस्या रूपलावण्यलुब्धाभ्यां जगद्घातिभ्यां मनसोत्सुकाभ्यां पाप-तिमिराभ्यां ममेयमित्यन्योन्यकलहाभ्यां 'प्रमाणपुरुषः कश्चित्पृच्छ्यताम्' इति मतौ कृतायां स एव भट्टारको वृद्धद्विजरूपः समागत्य तत्रोपस्थितः ।

अनन्तरम् 'आवाभ्यामियं स्वबललब्धा, कस्येयमावयोर्भवति' इति ब्राह्मणमपृच्छताम् ।

ब्राह्मणो ब्रूते—

'ज्ञानश्रेष्ठो द्विजः पूज्यः क्षत्रियस्तु बलाधिकः ।
धनधान्याधिको वैश्यः शूद्रस्तु द्विजसेवया ॥५५९॥

तद्युवां क्षत्रधर्मानुगौ । युद्ध एव युवयोर्नियमः ।' इत्यभिहिते सति 'साधूक्तमनेन' इति कृत्वान्योन्यतुल्यवीर्यौ समकालमन्योन्यघातेन विनाशमुपगतौ ।

अतोऽहं ब्रवीमि—'संधिमिच्छेत्समेनापि' (५५८) इत्यादि ।"

—:०:—

राजाह—'प्रागेव किं नोक्तं भवद्भिः ।'

मन्त्री ब्रूते—'मद्वचनं किमवसानपर्यन्तं श्रुतं भवद्भिः । तदापि मम संमत्या नायं विग्रहारम्भः । सन्धेयगुणयुक्तोऽयं हिरण्यगर्भो न विग्राह्यः । तथा चोक्तम्—

[टीका पु० पृ० २०५।४—२०७।२]

सत्यार्य-धार्मिकाऽनार्य-भ्रातृसंघातवान्बली ।
अनेकयुद्धविजयी संधेयाः सप्त कीर्तिताः ॥५६०॥'
सत्योऽनुपालयन्सत्यं संधितो नैति विक्रियाम् ।
प्राणबाधेऽपि सुव्यक्तमार्यो नायात्यनार्यताम् ॥५६१॥
धार्मिकस्याभियुक्तस्य सर्व एव हि युध्यते ।
प्रजानुरागाद्धर्माच्च दुःखोच्छेद्यो हि धार्मिकः ॥५६२॥
संधिः कार्योऽप्यनार्येण विनाशे समुपस्थिते ।
विना तस्याश्रयेणान्यः कुर्यान्न कालयापनम् ॥५६३॥
संहतत्वाद्यथा वेणुर्निबिडैः कण्टकैर्वृतः ।
न शक्यते समुच्छेत्तुं भ्रातृसंघातवांस्तथा ॥५६४॥
बलिना सह योद्धव्यमिति नास्ति निदर्शनम् ।
प्रतिवातं न हि घनः कदाचिदुपसर्पति ॥५६५॥
जमदग्नेः सुतस्येव सर्वः सर्वत्र सर्वदा ।
अनेकयुद्धजयिनः प्रतापादेव भुज्यते ॥५६६॥
अनेकयुद्धविजयी संधानं यस्य गच्छति ।
तत्प्रतापेन तस्याशु वशमायान्ति शत्रवः ॥५६७॥

तत्र तावद्बहुभिर्गुणैरुपेतः संधेयोऽयं राजा ।'

चक्रवाकोऽवदत्—'प्रणिधे, सर्वमवगतम् । व्रज पुनर्ज्ञात्वागमिष्यसि ।'
राजा चक्रवाकं पृष्टवान्—'मन्त्रिन्, असंधेयाः कति । तान्विज्ञातु-मिच्छामि ।'

मन्त्री ब्रूते—'देव, कथयामि । शृणु—

बालो वृद्धो दीर्घरोगी तथा ज्ञातिबहिष्कृतः ।
भीरुको भीरुकजनो लुब्धो लुब्धजनस्तथा ॥५६८॥
विरक्तप्रकृतिश्चैव विषयेष्वतिसक्तिमान् ।
अनेकचित्तमन्त्रस्तु देवब्राह्मणनिन्दकः ॥५६९॥
दैवोपहतकश्चैव दैवचिन्तक एव च ।
दुर्भिक्षव्यसनोपेतो बलव्यसनसंकुलः ॥५७०॥

[टीका पु० पृ० २०७।२—२०८।४]

अदेशस्थो बहुरिपुर्युक्तः कालेन यश्च न।
सत्यधर्मव्यपेतश्च विंशतिः पुरुषा अमी ॥५७१॥
एतैः संधिं न कुर्वीत विगृह्णीयात्तु केवलम्।
एते विगृह्यमाणा हि क्षिप्रं यान्ति रिपोर्वशम् ॥५७२॥
'बालस्याल्पप्रभावत्वान्न लोको योद्धुमिच्छति।
युद्धायुद्धफलं यस्माज्ज्ञातुं शक्तो न बालिशः ॥५७३॥'
'उत्साहशक्तिहीनत्वाद्वृद्धो दीर्घामयस्तथा।
स्वैरेव परिभूयेते द्वावप्येतावसंशयम् ॥५७४॥'
'सुखोच्छेद्यस्तु भवति सर्वज्ञातिबहिष्कृतः।
त एवैनं विनिघ्नन्ति ज्ञातयोऽनात्मसात्कृताः ॥५७५॥'
'भीरुयुद्धपरित्यागात्स्वयमेव प्रणश्यति।'
'तथैव भीरुपुरुषः संग्रामे तैर्विमुच्यते ॥ ५७६ ॥
'लुब्धस्यासंविभागित्वान्न युध्यन्तेऽनुयायिनः।'
लुब्धानुजीविकैरेष दानभिन्नैर्निहन्यते ॥५७७॥
'संत्यज्यते प्रकृतिभिर्विरक्तप्रकृतिर्युधि।'
'सुखाभियोज्यो भवति विषयेष्वतिसक्तिमान् ॥५७८॥
'अनेकचित्तमन्त्रस्तु द्वेष्यो भवति मन्त्रिणाम्।
अनवस्थितचित्तत्वात्कार्ये तैः स उपेक्ष्यते ॥५७९॥'
'सदाऽधर्मबलीयस्त्वा द्देवब्राह्मणनिन्दकः।
विशीर्यते स्वयं ह्येष दैवोपहतकस्तथा ॥५८०॥'
'संपत्तेश्च विपत्तेश्च दैवमेव हि कारणम्।
इति दैवपरो ध्यायन्नात्मानमपि चेष्टते ॥५८१॥'
'दुर्भिक्षव्यसनी चैव स्वयमेवावसीदति।'
'बलव्यसनयुक्तस्य योद्धुं शक्तिर्न जायते ॥५८२॥'
'अदेशस्थो हि रिपुणा स्वल्पकेनापि हन्यते।
ग्राहोऽल्पीयानपि जले गजेन्द्रमपि कर्षति ॥५८३॥'
'बहुशत्रुस्तु संत्रस्तः श्येनमध्ये कपोतवत्।
येनैव गच्छति पथा तेनैवाशु विपद्यते ॥५८४॥'

[टीका पु० पृ० २०६।१—२११।१]

'अकालसैन्ययुक्तस्तु हन्यते कालयोधिना ।
कौशिकेन हतज्योतिर्निशीथइववायसः ॥५८५॥'
'सत्यधर्मव्यपेतेन न संदध्यात्कदाचन ।
स संधितोऽप्यसाधुत्वादचिराद्याति विक्रियाम् ॥५८६॥'

अपरमपि कथयामि । संधिविग्रहयानासनसंश्रयद्वैधीभावाः षाड्गुण्यम् । कर्मणामारम्भोपायः, पुरुषद्रव्यसंपद्, देशकालविभागो, विनिपातप्रतीकारः, कार्यसिद्धिश्च पञ्चाङ्गो मन्त्रः । सामदानभेददण्डाश्चत्वार उपायाः । उत्साहशक्तिर्मन्त्रशक्तिः प्रभुशक्तिश्चेति शक्तित्रयम् । एतत्सर्वमालोच्य नित्यं विजिगीषवो भवन्ति महान्तः ।

या हि प्राणपरित्यागमूल्येनापि न लभ्यते ।
सा श्रीर्नीतिविदां वेश्म चञ्चलापि न मुञ्चति ॥५८७॥

तथा चोक्तम्—

वित्तं यदा यस्य समं विभक्तं गूढश्च चारो निभृतश्च मन्त्रः ।
न चाप्रियं प्राणिषु यो ब्रवीति स सागरान्तां पृथिवीं प्रशास्ति ॥५८८॥

किंतु देव, यद्यपि महामन्त्रिणा गृध्रेण संधानमुपन्यस्तं तथापि तेन राज्ञा संप्रति भूतजयदर्पान्न मन्तव्यम् । तदेवं क्रियताम् । सिंहलद्वीपस्य महाबलो नाम सारसो राजाऽस्मन्मित्रं जम्बुद्वीपे कोपं जनयतु । यतः—

सुगुप्तिमाधाय सुसंहतेन बलेन वीरो विचरन्नरातिम् ।
संतापयेद्येन समं प्रतप्तस्तप्तेन संधानमुपैति तप्तः ॥५८९॥'

राज्ञा 'एवमस्तु' इति निगद्य विचित्रनामा बकः सुगुप्तलेखं दत्त्वा सिंहलद्वीपं प्रस्थापितः ।

अथ प्रणिधिरागत्योवाच—'देव, श्रूयतां तत्रत्यप्रस्तावः ।

एवं तत्र गृध्रेणोक्तम्—'देव, यन्मेघवर्णस्तत्र चिरमुषितः । स वेत्ति—'किं संधेयगुणयुक्तो हिरण्यगर्भो राजा न वा' इति ।

ततोऽसौ मेघवर्णश्चित्रवर्णेन राज्ञा समाहूय पृष्टः—'वायस, कीदृशोऽसौ हिरण्यगर्भः । चक्रवाको मन्त्री वा कीदृशः ।'

वायस उवाच—'देव, हिरण्यगर्भो राजा युधिष्ठिरसमो महाशयः । चक्रवाकसमो मन्त्री न क्वाप्यवलोक्यते ।'

[टीका पु० पृ० २११।१—२१२।३]

राजाह—'यद्येवं तदा कथमसौ त्वया वञ्चितः ।'

विहस्य मेघवर्णः प्राह—'देव—

विश्वासप्रतिपन्नानां वञ्चने का विदग्धता ।
अङ्कमारुह्य सुप्तं हि हत्वा किं नाम पौरुषम् ॥५६०॥

शृणु देव, तेन मन्त्रिणाऽहं प्रथमदर्शन एव ज्ञातः । किंतु महाशयोऽसौ राजा । तेन मया विप्रलब्धः । तथा चोक्तम्—

आत्मौपम्येन यो वेत्ति दुर्जनं सत्यवादिनम् ।
स तथा वञ्च्यते धूर्तैर्ब्राह्मणश्छागतो यथा ॥५६१॥'

राजोवाच—'कथमेतत् ।'

मेघवर्णः कथयति—

[३० श ब्राह्मण धूर्त कथा—]

"अस्ति गौतमस्यारण्ये प्रस्तुतयज्ञः कश्चिद्ब्राह्मणः । स च यज्ञार्थं ग्रामान्तराच्छागमुपक्रीय स्कन्धे धृत्वा गच्छन्धूर्तत्रयेणावलोकितः । ततस्ते धूर्ता 'यद्येष छागः केनाप्युपायेन लभ्यते, तदा मतिप्रकर्षो भवति' इति समालोच्य वृक्षत्रयतले क्रोशान्तरेण तस्य ब्राह्मणस्यागमनं प्रतीक्ष्य पथि स्थिताः ।

तत्रैकेन धूर्तेन गच्छन् स ब्राह्मणोऽभिहितः—'भो ब्राह्मण, किमिति कुक्कुरः स्कन्धेनोह्यते ।'

विप्रेणोक्तम्—नायं श्वा, किंतु यज्ञच्छागः ।'

अथानन्तरस्थितेनान्येन धूर्तेन तथैवोक्तम्—तदाकर्ण्य ब्राह्मणश्छागं भूमौ निधाय मुहुर्निरीक्ष्य पुनः स्कन्धे कृत्वा दोलायमानमतिश्चलितः । यतः—

मतिर्दोलायते सत्यं सतामपि खलोक्तिभिः ।
ताभिर्विश्वासितश्चासौ म्रियते चित्रकर्णवत् ॥५६२॥'

राजाह—'कथमेतत् ।'

स कथयति—

[३१ श चित्रकर्ण कथा---]

"अस्ति कस्मिंश्चिद्वनोद्देशे मदोत्कटो नाम सिंहः ।

[टीका पु० पृ० २१२।३—२१४।२]

तस्य सेवकास्त्रयः--काको, व्याघ्रो, जम्बुकश्च ।

अथ तैर्भ्रमद्भिः सार्थाद्भ्रष्टः कश्चिदुष्ट्रो दृष्टः, पृष्टश्च—'कुतो भवानागतः'।

स चात्मवृत्तान्तमकथयत् ।

ततस्तैर्नीत्वा सिंहेऽसौ समर्पितः ।

तेनाभयवाचं दत्त्वा **चित्रकर्ण** इति नाम कृत्वा स्थापितः ।

अथ कदाचित्सिंहस्य शरीरवैकल्याद्भूरिवृष्टिकारणाच्चाहारमलभमानास्ते व्यग्रा बभूवुः ।

ततस्तैरालोचितम्—'चित्रकर्णमेव यथा स्वामी व्यापादयति तथानुष्ठीयताम् । किमनेन कण्टकभुजा ।'

व्याघ्र उवाच—'स्वामिनाऽभयवाचं दत्त्वाऽनुगृहीतः' तत्कथमेवं संभवति ।'

काको ब्रूते—'इह समये परिक्षीणः स्वामी पापमपि करिष्यति ।

यतः—

त्यजेत्क्षुधार्ता महिला स्वपुत्रं खादेत्क्षुधार्ता भुजगी स्वमण्डम् ।
बुभुक्षितः किं न करोति पापं क्षीणा नरा निष्करुणा भवन्ति ॥५६३॥

अन्यच्च—

मत्तः प्रमत्तश्चोन्मत्तः श्रान्तः क्रुद्धो बुभुक्षितः ।
लुब्धो भीरुस्त्वरायुक्तः कामुकश्च न धर्मवित् ॥५६४॥

इति संचिन्त्य सर्वे सिंहान्तिकं जग्मुः ।

सिंहेनोक्तम्—'आहारार्थं किंचित्प्राप्तम् ? ।'

तैरुक्तम्—'यत्नादपि न प्राप्तं किंचित् ।'

सिंहेनोक्तम्—'कोऽधुना जीवनोपायः ? ।'

काको वदति—'देव, स्वाधीनाहारपरित्यागात्सर्वनाशोऽयमुपस्थितः ।'

सिंहेनोक्तम्—'अत्राहारः कः स्वाधीनः ? ।'

काकः कर्णे कथयति—'चित्रकर्णः' इति ।

सिंहो भूमिं स्पृष्ट्वा कर्णौ स्पृशति । अभयवाचं दत्त्वा धृतोऽयमस्माभिः । तत्कथमेवं संभवति । तथा च—

[टीका पु० पृ० २१४।२—२१६।१]

न भूप्रदानं न सुवर्णदानं न गोप्रदानं न तथाऽन्नदानम् ।
यथा वदन्तीह महाप्रदानं सर्वेषु दानेष्वभयप्रदानम् ॥५६५॥
सर्वकामसमृद्धस्य अश्वमेधस्य यत्फलम् ।
तत्फलं लभते सम्यग्रक्षिते शरणागते ॥५६६॥

काको ब्रूते—'नासौ स्वामिना व्यापादयितव्यः । किंत्वस्माभिरेव तथा कर्तव्यं यथाऽसौ स्वदेहदानमङ्गीकरोति ।'

सिंहस्तच्छ्रुत्वा तूष्णीं स्थितः ।

ततोऽसौ लब्धावकाशः कूटं कृत्वा सर्वानादाय सिंहान्तिकं गतः ।

अथ काकेनोक्तम्—'देव, यत्नादप्याहारो न प्राप्तः । अनेकोपवासखिन्नः स्वामी । तदिदानीं मदीयमांसमुपभुज्यताम् । यतः—

स्वामिमूला भवन्त्येव सर्वाः प्रकृतयः खलु ।
समूलेषु हि वृक्षेषु प्रयत्नः सफलो नृणाम् ॥५६७॥'

सिंहेनोक्तम्—वरं प्राणपरित्यागः । न पुनरीदृशि कर्मणि प्रवृत्तिः ।'

जम्बुकेनापि तथोक्तम् ।

ततः सिंहेनोक्तम्—'मैवम् ।'

अथ व्याघ्रेणोक्तम्—'मद्देहेन जीवतु स्वामी ।'

सिंहेनोक्तम्—'न कदाचिदेवमुचितम् ।'

अथ चित्रकर्णोऽपि जातविश्वासस्तथैवात्मदानमाह ॥

तद्वदन्नेवासौ व्याघ्रेण कुक्षिं विदार्य व्यापादितः सर्वैर्भक्षितश्च ।

अतोऽहं ब्रवीमि—'मतिर्दोलायते सत्यम् ५६२' इत्यादि ॥"

—:०:—

ततस्तृतीयधूर्तवचनं श्रुत्वा स्वमतिभ्रमं निश्चित्य छागं त्यक्त्वा ब्राह्मणः स्नात्वा गृहं ययौ । स छागस्तैर्धूर्तैर्नीत्वा भक्षितः ।

अतोऽहं ब्रवीमि—'आत्मौपम्येन यो वेत्ति ५६१' इत्यादि ॥"

—:०:—

राजाह—'मेघवर्ण, कं शत्रुमध्ये त्वया चिरमुषितम् । कथं वा तेषामनुनयः कृतः ।'

[टीका पु० पृ० २१६।१—२१८।१]

मेघवर्ण उवाच—'देव, स्वामिकार्यार्थिना स्वप्रयोजनवशाद्वा किं न क्रियते । पश्य—

लोको वहति किं राजन्न मूर्ध्ना दग्धुमिन्धनम् ।
क्षालयन्नपि वृक्षाङ्घ्रिं नदीवेगो निकृन्तति ॥५९८॥
स्कन्धेनापि वहेच्छत्रून्कार्यमासाद्य बुद्धिमान् ।
यथा वृद्धेन सर्पेण मण्डूका विनिपातिताः' ॥५९९॥

राजाह—'कथमेतत् ।'

मेघवर्णः कथयति—

[३२ श वृद्ध सर्प मण्डूक कथा—]

"अस्ति जीर्णोद्याने मन्दविषो नाम सर्पः ।

सोऽतिजीर्णतयाऽऽहारमप्यन्वेष्टुमक्षमः सरस्तीरे पतित्वा स्थितः ।

ततो दूरादेव केनचिन्मण्डूकेन दृष्टः, पृष्टश्च—'किमिति त्वमाहारं नान्विष्यसि ।

सर्पोऽवदत्—'गच्छ भद्र, मम मन्दभाग्यस्य प्रश्नेन किम् ।'

ततः संजातकौतुकः स च भेकः 'सर्वथा कथ्यताम्' इति तं सर्पमाह ।

सर्पोऽप्याह—'भद्र,ब्रह्मपुरवासिनः श्रोत्रियस्य कौण्डिन्यस्य पुत्रो विंशतिवर्षदेशीयः सर्वगुणसंपन्नो दुर्दैवान्मया नृशंसेन दष्टः ।

तं पुत्रं सुशीलनामानं मृतमालोक्य मूर्छितः कौण्डिन्यः पृथिव्यां लुलोठ ।

अनन्तरं ब्रह्मपुरवासिनः सर्वे बान्धवास्तत्रागत्योपविष्टाः । तथा चोक्तम्—

'उत्सवे व्यसने युद्धे दुर्भिक्षे राष्ट्रविप्लवे ।
राजद्वारे श्मशाने च यस्तिष्ठति स बान्धवः ॥६००॥'

तत्र कपिलो नाम स्नातकोऽवदत्—'अरे कौण्डिन्य, मूढोऽसि । तेनैवं विलपसि । शृणु—

क्रोडीकरोति प्रथमं यदा जातमनित्यता ।
धात्रीव जननी पश्चात्तदा शोकस्य कः क्रमः ॥६०१॥

[टीका पु० पृ० २१८।१—२१६।३]

क्व गताः पृथिवीपालाः ससैन्यबलवाहनाः ।
वियोगसाक्षिणी येषां भूमिरद्यापि तिष्ठति ॥६०२॥

कायः संनिहितापायः संपदः पदमापदाम् ।
समागमाः सापगमाः सर्वमुत्पादि भङ्गुरम् ॥६०३॥

प्रतिक्षणमयं कायः क्षीयमाणो न लक्ष्यते ।
आमकुम्भ इवाम्भःस्थो विशीर्णः सन्विभाव्यते ॥६०४॥

आसन्नतरतामेति मृत्युर्जन्तोर्दिने दिने ।
आघातं नीयमानस्य वध्यस्येव पदे पदे ॥६०५॥

अनित्यं यौवनं रूपं जीवितं द्रव्यसंचयः ।
ऐश्वर्यं प्रियसंवासो मुह्येत्तत्र न पण्डितः ॥६०६॥

यथा काष्ठं च काष्ठं च समेयातां महोदधौ ।
समेत्य च व्यपेयातां तद्वद्भूतसमागमः ॥६०७॥

यथा हि पथिकः कश्चिच्छायामाश्रित्य तिष्ठति ।
विश्रम्य च पुनर्गच्छेत्तद्वद्भूतसमागमः ॥६०८॥

पञ्चभिर्निर्मिते देहे पञ्चत्वं च पुनर्गते ।
स्वां स्वां योनिमनुप्राप्ते तत्र का परिदेवना ॥६०९॥

यावतः कुरुते जन्तुः संबन्धान्मनसः प्रियान् ।
तावन्तोऽपि निखन्यन्ते हृदये शोकशङ्कवः ॥६१०॥

नायमत्यन्तसंवासो लभ्यते येन केनचित् ।
अपि स्वेन शरीरेण किमुतान्येन केनचित् ॥६११॥

संयोगो हि वियोगस्य संसूचयति संभवम् ।
अनतिक्रमणीयस्य जन्म मृत्योरिवागमम् ॥६१२॥

आपातरमणीयानां संयोगानां प्रियैः सह ।
अपथ्यानामिवान्नानां परिणामोऽतिदारुणः ॥६१३॥

[टीका पु० पृ० २१६।३—२२१।२]

व्रजन्ति न निवर्तन्ते स्रोतांसि सरितां यथा ।
आयुरादाय मर्त्यानां तथा रात्र्यहनी सदा ॥६१४॥
सुखास्वादपरो यस्तु संसारे सत्समागमः ।
स वियोगावसानत्वाद्दुःखानां धुरि युज्यते ॥६१५॥
अत एव हि नेच्छन्ति साधवः सत्समागमम् ।
यद्वियोगासिलूनस्य मनसो नास्ति भेषजम् ॥६१६॥
सुकृतान्येव कर्माणि राजभिः सगरादिभिः ।
अथ तान्यपि कर्माणि ते चापि प्रलयं गताः ॥६१७॥
संचिन्त्य संचिन्त्य तमुग्रदण्डं मृत्युं मनुष्यस्य विचक्षणस्य ।
वर्षाम्बुसिक्ता इव चर्मबन्धाः सर्वे प्रयत्नाः शिथिलीभवन्ति ॥६१८॥
यामेव रात्रिं प्रथमामुपैति गर्भे निवासं नरवीर लोकः ।
ततः प्रभृत्यस्खलितप्रयाणः स प्रत्यहं मृत्युसमीपमेति ॥६१९॥

अतः संसारं विचारयतां शोकोऽयमज्ञानस्यैव प्रपञ्चः । पश्य—

अज्ञानं कारणं न स्याद्वियोगो यदि कारणम् ।
शोको दिनेषु गच्छत्सु वर्धतामपयाति किम् ॥६२०॥

तदत्रात्मानमनुसंधेहि । शोकचर्चां परिहर । यतः—

अकाण्डपातजातानामार्द्राणां मर्मभेदिनाम् ।
गाढशोकप्रहाराणामचिन्तैव महौषधी ॥६२१॥'

ततस्तद्वचनं निशम्य प्रबुद्ध इव कौण्डिन्य उत्थायाब्रवीत्—'तदलमिदानीं गृहनरकवासेन । वनमेव गच्छामि ।'

कपिलः पुनराह—

'वनेऽपि दोषाः प्रभवन्ति रागिणां
गृहेऽपि पञ्चेन्द्रियनिग्रहस्तपः ।
अकुत्सिते कर्मणि यः प्रवर्तते
निवृत्तरागस्य गृहं तपोवनम् ॥६२२॥

[टीका पु० पृ० २२१।२२—२२२।३]

दुःखितोऽपि चरेद्धर्मं यत्र कुत्राश्रमे रतः ।
समः सर्वेषु भूतेषु न लिङ्गं धर्मकारणम् ॥ ६२३ ॥

आत्मा नदी संयमपुण्यतीर्था सत्योदका शीलतटा दयोर्मिः ।
तत्राभिषेकं कुरु पाण्डुपुत्र न वारिणा शुध्यति चान्तरात्मा ॥६२४॥

जन्ममृत्युजराव्याधिवेदनाभिरुपद्रुतम् ।
संसारमिममत्यन्तमसारं त्यजतः सुखम् ॥ ६२५ ॥

दुःखमेवास्ति न सुखं यस्मात्तदुपलक्ष्यते ।
दुःखार्तस्य प्रतीकारे सुखसंज्ञा विधीयते ॥ ६२६ ॥'

कौण्डिन्यो ब्रूते—'एवमेव ।'

ततोऽहं तेन शोकाकुलेन ब्राह्मणेन शप्तः—'यदद्यारभ्य मण्डूकानां वाहनं भविष्यसि' इति ।

कपिलो ब्रूते—'स प्रत्युपदेशासहिष्णु वान्तशापविषं ते हृदयम् । तथापि कार्यं शृणु—

सङ्गः सर्वात्मना त्याज्यः स चेत्त्यक्तुं न शक्यते ।
स सद्भिः सह कर्तव्यः सतां सङ्गो हि भेषजम् ॥ ६२७ ॥

अन्यच्च—

कामः सर्वात्मना हेयः स चेद्धातुं न शक्यते ।
मुमुक्षां प्रति कर्तव्यः सैव तस्य हि भेषजम् ॥ ६२८ ॥'

एतच्छ्रुत्वा स कौण्डिन्यः कपिलोपदेशामृतप्रशान्तशोकानलो यथाविधि दण्डग्रहणं कृतवान् । अतो ब्राह्मणशापान्मण्डूकान्वोढुमत्र तिष्ठामि ।''

अनन्तरं तेन मण्डूकेन गत्वा मण्डूकनाथस्य जालपादनाम्नोऽग्रे तत्कथितम् ।

ततोऽसावागत्य मण्डूकनाथस्तस्य सर्पस्य पृष्ठमारूढवान् ।
स च सर्पस्तं पृष्ठे कृत्वा चित्रपदक्रमं बभ्राम ।

[टीका पु० पृ० २२३।२—२२५।१]

परेद्युश्चलितुमसमर्थं तं मण्डूकनाथोऽवदत्—'किमद्य भवान्मन्दगतिः।'

सर्पो ब्रूते—'देव, आहारविरहादसमर्थोऽस्मि।'

मण्डूकनाथोऽवदत्—'अस्मदाज्ञया मण्डूकान्भक्षय।'

ततः [स] 'गृहीतोऽयंमहाप्रसादः' इत्युक्त्वा क्रमशो मण्डूकान्खादितवान्। अथो निर्मण्डूकं सरो विलोक्य मण्डूकनाथोऽपि तेन खादितः।

अतोऽहं ब्रवीमि—'स्कन्धेनापि वहेच्छत्रून् ५९९' इत्यादि॥"

—:०:—

'देव, यात्विदानीं पुरावृत्ताख्यानकथनम्। सर्वथा संधेयोऽयं हिरण्यगर्भो राजा संधीयताम्' इति मे मतिः।'

राजोवाच—'कोऽयं भवतो विचारः। यतो जितस्तावदयमस्माभिस्ततो यद्यस्मत्सेवया वसति तदास्ताम्। नो चेद्विगृह्यताम्।'

अत्रान्तरे जम्बुद्वीपादागत्य शुकेनोक्तम्—'देव, सिंहलद्वीपस्य सारसो राजा संप्रति जम्बुद्वीपमाक्रम्यावतिष्ठते।'

राजा ससंभ्रमं ब्रूते—'किं किम्।'

शुकः पूर्वोक्तं कथयति।

गृध्रः स्वगतमुवाच—'साधु रे चक्रवाक मन्त्रिन् सर्वज्ञ, साधु साधु।'

राजा सकोपमाह—'आस्तां तावदयम्। गत्वा तमेव समूलमुन्मूलयामि।'

दूरदर्शी विहस्याह—

'न शरन्मेघवत्कार्यं वृथैव घनगर्जितम्।
परस्यार्थमनर्थं वा प्रकाशयति नो महान्॥ ६२९॥
एकदा न विगृह्णीयाद्बहून्राजाऽभिघातिनः।
सदर्पोऽप्युरगः कीटैर्बहुभिर्नाश्यते ध्रुवम्॥ ६३०॥

देव, किमिति विना संधानं गमनमस्ति। यतस्तदाऽस्मत्पश्चात्प्रकोपोऽनेन कर्तव्यः। अपरं च—

योऽर्थतत्त्वमविज्ञाय क्रोधस्यैव वशं गतः।
स तथा तप्यते मूढो ब्राह्मणो नकुलाद्यथा'॥ ६३१॥

[टीका पु० पृ० २२५।१—२२६।३]

राजाह—'कथमेतत्।'

दूरदर्शी कथयति—

[३३ श ब्राह्मण नकुल कथा—]

'अस्त्युज्जयिन्यां माधवो नाम विप्रः।

तस्य ब्राह्मणी प्रसूता।

सा बालापत्यस्य रक्षार्थं ब्राह्मणमवस्थाप्य स्नातुं गता।

अथ ब्राह्मणाय राज्ञः पार्वणश्राद्धं दातुमाह्वानमागतम्।

तच्छ्रुत्वा ब्राह्मणः सहजदारिद्र्यादचिन्तयत्—'यदि सत्वरं न गच्छामि तदा तत्रान्यः कश्चिच्छ्राद्धं ग्रहीष्यति। यतः—

आदानस्य प्रदानस्य कर्तव्यस्य च कर्मणः।
क्षिप्रमक्रियमाणस्य कालः पिबति तद्रसम्॥ ६३२॥

किंतु बालकस्यात्र रक्षको नास्ति। तत्किं करोमि। यातु। चिरकालपालितमिमं नकुलं पुत्रनिर्विशेषं बालकरक्षार्थं व्यवस्थाप्य गच्छामि।'

तथा कृत्वा गतः।

ततस्तेन नकुलेन बालकसमीपमागच्छन्कृष्णसर्पो दृष्ट्वा व्यापादितः। खण्डितश्च।

ततोऽसौ नकुलो ब्राह्मणमायान्तमवलोक्य रक्तविलिप्तमुखपादः सत्वरमुपगम्य तच्चरणयोर्लुलोठ।

ततः स विप्रस्तथाविधं तं दृष्ट्वा 'बालकोऽनेन खादित' इत्यवधार्य नकुलं व्यापादितवान्।

अनन्तरं यावदुपसृत्यापत्यं पश्यति ब्राह्मणस्तावद्बालकः सुस्थः सर्पश्च व्यापादितस्तिष्ठति।

ततस्तमुपकारकं नकुलं निरीक्ष्य भावितचेताः स परं विषादमगमत्।

अतोऽहं ब्रवीमि—'योऽर्थतत्त्वमविज्ञाय ६३१' इत्यादि॥"

अपरं च—

कामः क्रोधस्तथा मोहो लोभो मानो मदस्तथा।
षड्वर्गमुत्सृजेदेनमस्मिंस्त्यक्ते सुखी नरः॥ ६३३॥'

[टीका पु० पृ० २२६।३—२२८।३]

राजाह—'मन्त्रिन्, एष ते निश्चयः ।'

मन्त्री ब्रूते—'एवमेव । यतः—

स्मृतिस्तत्परताऽर्थेषु वितर्को ज्ञाननिश्चयः ।
दृढता मन्त्रगुप्तिश्च मन्त्रिणः परमा गुणाः ॥ ६३४ ॥
सहसा विदधीत न क्रियामविवेकः परमापदां पदम् ।
वृणते हि विमृश्यकारिणं गुणलुब्धाः स्वयमेव संपदः ॥६३५॥

तद्देव, यदिदानीमस्मद्वचनं क्रियते तदा संधाय गम्यताम् । यतः—

यद्यप्युपायाश्चत्वारो निर्दिष्टः साध्यसाधने ।
सख्यामात्रं फलं तेषां सिद्धिः साम्नि व्यवस्थिता ॥ ६३६ ॥

राजाह—'कथमेवं संभवति ।'

मन्त्री ब्रूते—'देव, सत्वरं भविष्यति । यतः—

अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः ।
ज्ञानलवदुर्विदग्धं ब्रह्मापि नरं न रञ्जयति ॥ ६३७ ॥

विशेषतश्चायं धर्मज्ञो राजा सर्वज्ञो मन्त्री च । ज्ञातमेतन्मया पूर्वं मेघवर्णवचनात्तत्कृतकार्यसंदर्शनाच्च । यतः—

कर्मानुमेयाः सर्वत्र परोक्षगुणवृत्तयः ।
तस्मात्परोक्षवृत्तीनां फलैः कर्मानुभाव्यते ॥ ६३८ ॥'

राजाह—'अलमुत्तरोत्तरेण । यथाभिप्रेतमनुष्ठीयताम् ।'

एतन्मन्त्रयित्वा गृध्रो महामन्त्री 'तत्र यथार्हं कर्तव्यम्' इत्युक्त्वा दुर्गाभ्यन्तरं चलितः ।

ततः प्रणिधिबकेनागत्य राज्ञो हिरण्यगर्भस्य निवेदितम्—'देव, संधिं कर्तुं महामन्त्री गृध्रोऽस्मत्समीपमागच्छति ।'

राजहंसो ब्रूते—'मन्त्रिन्, पुनः संबन्धिना केनचिदत्रागन्तव्यम् ।'

सर्वज्ञो विहस्याह—'देव, न शङ्कास्पदमेतत् । यतोऽसौ महाशयो दूरदर्शी । अथवा स्थितिरियं मन्दमतीनाम्—कदाचिच्छङ्कैव न क्रियते, कदाचित्सर्वत्र शङ्का । तथा हि—

[टीका पु० पृ० २२८।३—२३०।१]

सरसि बहुशस्ताराच्छायेक्षणात्परिवञ्चितः
कुमुदविटपान्वेषी हंसो निशास्वविचक्षणः ।
न दशति पुनस्ताराशङ्की दिवापि सितोत्पलं
कुहकचकितो लोकः सत्येऽप्यपायमपेक्षते ॥ ६३९ ॥
दुर्जनदूषितमनसः सुजनेष्वपि नास्ति विश्वासः ।
बालः पायसदग्धो दध्यपि फूत्कृत्य भक्षयति ॥ ६४० ॥'

तद्देव, यथाशक्ति तत्पूजार्थं रत्नोपहारादिसामग्री सुसज्जीक्रियताम् ।' तथानुष्ठिते सति स गृध्रो मन्त्री दुर्गद्वाराच्चक्रवाकेणोपगम्य सत्कृत्यानीय राजदर्शनं कारितो दत्तासने चोपविष्टः ।

चक्रवाक उवाच—'युष्मदायत्तं सर्वम् । स्वेच्छयोपभुज्यतामिदं राज्यम् ।'

राजहंसो ब्रूते—'एवमेव ।'

दूरदर्शी कथयति—'एवमेवैतत् । किंत्विदानीं बहुप्रपञ्चवचनं निष्प्रयोजनम् । यतः—

लुब्धमर्थेन गृह्णीयात्स्तब्धमञ्जलिकर्मणा ।
मूर्खं छन्दानुरोधेन याथातथ्येन पण्डितम् ॥ ६४१ ॥
सद्भावेन हरेन्मित्रं संभ्रमेण तु बान्धवान् ।
स्त्रीभृत्यौ दानमानाभ्यां दाक्षिण्येनेतराञ्जनान् ॥ ६४२ ॥

तदिदानीं संधाय गम्यतामयं महाप्रतापश्चित्रवर्णो राजा ।'

चक्रवाको ब्रूते—'यथा संधानं कार्यं, तदप्युच्यताम् ।'

राजहंसो ब्रूते—'कति प्रकाराः संधीनां संभवन्ति ।'

गृध्रो ब्रूते—'कथयामि । श्रूयताम्—

बलीयसाऽभियुक्तस्तु नृपोऽनन्यप्रतिक्रियः ।
आपन्नः संधिमन्विच्छेत्कुर्वाणः कालयापनम् ॥ ६४३ ॥
कपाल उपहारश्च संतानः संगतस्तथा ।
उपन्यासः प्रतीकारः संयोगः पुरुषान्तरः ॥ ६४४ ॥
अदृष्टनर आदिष्ट आत्मादिष्ट उपग्रहः ।
परिक्रयस्तथोच्छिन्नस्तथा च परभूषणः ॥ ६४५ ॥

[टीका पु० पृ० २३०।१—२३१।३]

स्कन्धोपनेयः संधिश्च षोडशैते प्रकीर्तिताः ।
इति षोडशकं प्राहुः संधिं संधिविचक्षणाः ॥ ६४६ ॥
१ 'कपालसंधिर्विज्ञेयः केवलं समसंधितः ।'
२ 'संप्रदानाद्भवति य उपहारः स उच्यते ॥ ६४७ ॥'
३ 'संतानसंधिर्विज्ञेयो दारिकादानपूर्वकः ।'
४ सद्भिस्तु संगतः संधिर्मैत्रीपूर्व उदाहृतः ॥ ६४८ ॥
यावदायुःप्रमाणस्तु समानार्थप्रयोजनः ।
संपत्तौ वा विपत्तौ वा कारणैर्यो न भिद्यते ॥ ६४९ ॥
संगतः संधिरेवायं प्रकृष्टत्वात्सुवर्णवत् ।
तथान्यैः संधिकुशलैः काञ्चनः स उदाहृतः ॥ ६५० ॥'
५ 'आत्मकार्यस्य सिद्धिं तु समुद्दिश्य क्रियेत यः ।
स उपन्यासकुशलैरुपन्यास उदाहृतः ॥ ६५१ ॥'
'मयास्योपकृतं पूर्वं ममाप्येष करिष्यति ।
६ इति यः क्रियते संधिः प्रतीकारः स उच्यते ॥६५२ ॥
उपकारं करोम्यस्य ममाप्येष करिष्यति ।
अयं चापि प्रतीकारो रामसुग्रीवयोरिव ॥६५३॥'
'एकार्थां सम्यगुद्दिश्य क्रियां यत्र हि गच्छतः ।
७ सुसंहितप्रयाणस्तु स च संयोग उच्यते ॥६५४॥'
'आवयोर्योधमुख्यैस्तु मदर्थः साध्यतामिति ।
८ यस्मिन्पणस्तु क्रियते स संधिः पुरुषान्तरः ॥६५५॥'
'त्वयैकेन मदीयोऽर्थः संप्रसाध्यस्त्वसाविति ।
९ यत्र शत्रुः पणं कुर्यात्सोऽदृष्टपुरुषः स्मृतः ॥६५६॥'
यत्र भूम्येकदेशेन पणेन रिपुरूर्जितः ।
१० संधीयते संधिविद्भिः स चादिष्ट उदाहृतः ॥६५७॥
११ 'स्वसैन्येन तु संधानमात्मादिष्ट उदाहृतः ।'
१२ 'क्रियते प्राणरक्षार्थं सर्वदानमुपग्रहः ॥६५८॥'

[टीका पु० पृ० २३१।३—२३३।३]

१३ 'कोषांशेनार्धकोषेण सर्वकोषेण वा पुनः ।
शिष्टस्य प्रतिरक्षार्थं परिक्रय उदाहृतः ॥६५६॥'
१४ 'भुवां सारवतीनां तु दानादुच्छिन्न उच्यते ।'
१५ 'भूम्युत्थफलदानेन सर्वेण परभूषणः ॥६६०॥'
१६ 'परिच्छिन्नं फलं यत्र प्रतिस्कन्धेन दीयते ।
स्कन्धोपनेयं तं प्राहुः संधिं संधिविचक्षणाः ॥६६१॥'
'परस्परोपकारस्तु मैत्रः संबन्धकस्तथा ।
उपहारश्च विज्ञेयाश्चत्वारश्चैव संधयः ॥६६२॥'
'एक एवोपहारस्तु संधिरेव मतो मम ।'
'उपहारस्य भेदास्तु सर्वे मैत्रविवर्जिताः ॥६६३॥'
अभियोक्ता बलीयस्त्वादलब्ध्वा न निवर्तते ।
उपहारादृते तस्मात्संधिरन्यो न विद्यते ॥६६४॥'

चक्रवाको ब्रूते—शृणु तावत् ।

'अयं निजः परो वेति गणना लघुचेतसाम् ।
उदारचरितानां तु वसुधैव कुटुम्बकम् ॥६६५॥'
मातृवत्परदारेषु परद्रव्येषु लोष्टवत् ।
आत्मवत्सर्वभूतेषु यः पश्यति स पण्डितः ॥६६६॥'

राजाह—'भवन्तो महान्तः पण्डिताश्च । तदत्रास्माकं यथाकार्यमुपदिश्यताम् ।'

मन्त्री ब्रूते—'आः, किमेवमुच्यते ।

आधिव्याधिपरीतापादद्य श्वो वा विनाशिने ।
को हि नाम शरीराय धर्मापेतं समाचरेत् ॥६६७॥
जलान्तश्चन्द्रचपलं जीवितं खलु देहिनाम् ।
तथाविधमिति ज्ञात्वा शश्वत्कल्याणमाचरेत् ॥६६८॥
मृगतृष्णासमं वीक्ष्य संसारं क्षणभङ्गुरम् ।
सज्जनैः संगतं कुर्याद्धर्माय च सुखाय च ॥६६९॥

[टीका पु० पृ० २३३।३—२३५।४]

तन्मम संमतेन तदेव क्रियताम् । यतः—

अश्वमेधसहस्राणि सत्यं च तुलया धृतम् ।
अश्वमेधसहस्राद्धि सत्यमेवातिरिच्यते ॥९७०॥

अतः सत्याभिधानदिव्यपुरःसरो द्वयोरप्यनयोर्भूपालयोः काञ्चनाभिधानसंधिर्विधीयताम् ।'

सर्वज्ञो ब्रूते—'एवमस्तु ।'

ततो राजहंसेन राज्ञा वस्त्रालंकारोपहारैः स मन्त्री दूरदर्शी पूजितः प्रहृष्टमनाश्चक्रवाकं गृहीत्वा राज्ञो मयूरस्य संनिधानं गतः ।

तत्र चित्रवर्णेन राज्ञा सर्वज्ञो गृध्रवचनाद्बहुमानदानपुरःसरं संभाषितस्तथाविधं संधिं स्वीकृत्य राजहंससमीपं प्रस्थापितः ।

दूरदर्शी ब्रूते—'देव, सिद्धं नः समीहितम् । इदानीं स्वस्थानमेव विन्ध्याचलं व्यावृत्य प्रतिगम्यताम् ।'

अथ सर्वे स्वस्थानं प्राप्य मनोभिलषितं फलं प्राप्नुवन्निति ।

विष्णुशर्मणोक्तम्—'अपरं किं कथयामि कथ्यताम् ।'

राजपुत्रा ऊचुः 'तव प्रसादाद्राज्यव्यवहाराङ्गं ज्ञातम् । ततः सुखिनो भूता वयम् ।'

इति हितोपदेशे सन्धिर्नाम चतुर्थः कथासंग्रहः समाप्तः ।

---

[1][प्रालेयाद्रेः सुतायाः प्रणयनिवसतिश्चन्द्रमौलिः स याव—
द्यावल्लक्ष्मीर्मुरारेर्जलद इव तडिन्मानसे विस्फुरन्ती ।
यावत्स्वर्णाचलोऽयं दवदहनसमो यस्य सूर्यः स्फुलिङ्ग-
स्तावन्नारायणेन प्रचरतु रचितः संग्रहोऽयं कथानाम् ॥९७१॥

अपरं च—

श्रीमान् धवलचन्द्रोऽसौ जीयान्माण्डलिको रिपून् ।
येनायं संग्रहो यत्नाल्लेखयित्वा प्रचारितः ॥९७२॥]

---

१ अयं कोष्ठकान्तर्गतः पाठो बहुत्र नोपलभ्यते ॥

आकरादिक्रमेण श्लोकानुक्रमणिका सपृष्ठाङ्का ।

अस्यामनुक्रमणिकायां संख्याङ्कैः पृष्ठसंख्या ज्ञेया ॥

Printed at the Mission Press, Allahabad.

I have gone through Mahamahopadhyaya Pandit Siva Datta's book giving meanings in Hindi of all Sanskrit words in the Hitopadesha, and I am glad to say that the key will be found to be most useful to students, as well as to all others who stand in need of such help. Panditji is an erudite scholar and author of several important works in Sanskrit. His deep and vast knowledge of Sanskrit literature and his long experience as a successful teacher and professor of that noble language have considerably added to the value and usefulness of this book, and I feel sure that it will prove a great success.

JAIPUR, March 22, 1918.

PANDIT GOPI NATH, M.A.,
Senior Member Council, Jaipur

I have looked through Mahamahopadhyaya Pandit Siva Datta's Translation of the Hitopadesha. The subject matter is cleverly arranged, so that reading from left to right, you get the meanings of individual words in the text, and reading from top downwards you obtain the Sanskrit text on the left and the Hindi rendering on the right.

I need hardly say anything about the translation. That it has been done by Pandit Siva Datta, one of the greatest Sanskrit scholars in India, is a sufficient warrant of its accuracy and excellence.

I have not the slightest hesitation in stating that the book is sure to prove of great use and help to all those who have occasion to consult it.

GOVERNMENT COLLEGE
Lahore, 6th March, 1919.

GULBHAR SINGH,
Professor of Sanskrit.

NOTES ON HITOPADESHA in Sanskrit and translation in Hindi by Pandit Siva Datta Mahamahopadhyaya Head Pandit Oriental College Lahore.

Price 1-0-0.